विश्वेदेवाः

(लघिष्ठकाव्यसङ्ग्रहः)



पूर्णप्रसादः ब्राह्मणः

विश्वेदेवाः

(लघिष्ठकाव्यसङ्ग्रहः)

पूर्णप्रसादः ब्राह्मणः

प्रथमसंस्करणम् २०११ वैक्रमाब्दे
द्वितीयसंस्करणम् (सपरिवर्धनम्) २०२७ वैक्रमाब्दे

प्रकाशक:–सर्वकारस्य संस्कृतिविभाग:

मूल्यम् ... ...

मुद्रणालय:– सर्वकारमुद्रणालय:
(श्री ५ को सरकारको छापाखाना)

एतत् प्रकाशयितुं समकल्प्यत नेपालराष्ट्रशुभ-
भविष्यदाशाऽऽलम्बनयोर्युवराज्ञीयुवराजा-
धिराजयोरैश्वर्यराज्यलक्ष्मीवीरेन्द्रयो
राष्ट्रियाऽनन्दमूर्तरूपशुभविवा-
होत्सवसमारोहे !

एतत् समर्प्यते

सत्यं परिचिचीषुभ्यः !

विश्वबन्धुत्वे जिगमिषुभ्यः !

आत्मनि विश्वात्मभावमानिनीषुभ्यः !

सम्माननीयानां नेपालराजकीयप्रज्ञाप्रतिष्ठानस्य (विद्वत्परिषदः) कुलपतीनाम् तत्र भवतां श्रीकेदारमान–व्यथितमहोदयानाम्

सम्मतिः

महाकविना श्रीपूर्णप्रसाद–ब्राह्मणेन प्रणीतः 'विश्वेदेवाः' इतिनामको लघिष्ठकाव्यसङ्ग्रहः सम्यगालोचितो मया। महापुरुषाणां चरितानि सङ्कलय्य संस्कृतभाषायाम्, सिद्धहस्तेन लेखकेन सर्वेभ्यो मनुष्येभ्यः प्रेरणा प्रदत्ता इत्यत्र नास्ति विप्रतिपत्तिः। किञ्च–संस्कृत-साहित्यागारे नूत्नं साहित्यरत्नं संस्थाप्य महान्तमुपकारं करोति कविरिति महान् हर्षस्य विषयः।

शिवतत्त्वस्यैव सार्वभौमिकीं प्रतिष्ठां संस्थापयितुं सत्यसापेक्षे कर्मसौन्दर्ये संलग्नानाममृतत्वमापन्नानां महापुरुषाणां जीवनचरितानि समेषां कृतेऽनुकरणीयानि भविष्यन्तीति विश्वसिमि। ग्रन्थेनाऽनेन ब्राह्मणमहाभागाः सत्यं यशोभागिनः सञ्जाता इत्यपि मन्ये।

–केदारमान 'व्यथित'

किञ्चिद् वक्तव्यम्

२०११ तमे वैक्रमाब्दे सम्पन्ने प्रथमसंस्करणे, साम्प्रतं सम्पत्स्यमाने द्वितीयसंस्करणे च मुख्यतया ममैतदेव वक्तव्यमासीदस्ति च— यत्र स्मृतिरस्माकं राष्ट्रस्य प्रथमविकासस्य, प्रादुर्भूता यतोऽस्माकमुत्तमा विश्वभावना, विश्वजनीनं विशालमुद्देश्यं च, प्राप्ता यतोऽस्माकं विचार उच्चता, आदर्शे च पवित्रता ! यत एव जीवतितरामस्माकं राष्ट्रियजीवनस्यैकता, यत एव वा वयं सार्वभौम–सम्बन्धाय ससाफल्याः! यत्राऽन्तर्हिताऽस्माकं सांस्कृतिकी गूढशक्तिः, यद्गर्भे वर्वर्ति विश्वज्ञानकोषः, योदमीलयद् विश्वेषामाध्यात्मिकीं दृशम्, याऽस्माकं विश्वेषामेव वा पूर्वजानां मातृभाषा, प्रायः सर्वासां च भाषाणां मूलम्, या विश्वेषामेव पैतृकी सम्पत्तिः ! सा भगवती संस्कृतभाषा न केवलं संरक्षणीया, हृदयेनैव केवलं सम्माननीया, न वा केवलं पूज्ययैव दृशा दर्शनीया, अपि तु विश्वभूतये त्यागतपसाऽप्युद्धरणीया, विकासनीया, प्रसारणीया चेति धारणावतामहमस्म्येकः । सा च धारणा तर्ह्येव फलवती भवेत्, यर्हि सर्वेषु क्षेत्रेषु संस्कृतोपासका येन केनाऽपि स्वेन विशिष्टेन वा नवेन ज्ञानेन युगानुकूलेन संस्कृतभाण्डागारं यावच्छक्यं समर्धयेयुः, प्रागपेक्षया संस्कृतभाषां सकलजनमनआकर्षिकामुपयोगितासम्पन्नां च कुर्युः । तस्या एव

धारणायाः प्रेरणाफलमेतत्– 'विश्वेदेवाः'। यत् पाठकेभ्यः संस्कृत उपहरन्नस्मि। यतो विश्ववन्द्यमीसामसीहम्, मुहम्मदम्, लिङ्कनम्, लेनिनम्, गान्धिं च संस्कृतेऽपि संस्कृताध्यायिनोऽपि परिचिन्वन्तुतमाम्, अन्यतो विश्वमानवसमुदायश्चैतां भगवतीं संस्कृतभाषामात्मीयां मातरमिव नितान्तपोषकेन चिरशान्त्यौपयिकेन स्वरसेन सदा जीवयन्तीं निकटसम्बन्धिनीमेवोत्तरोत्तरं जानन्तुतमाम्, नैव च तां केवलं भारतवर्षीयाणामेव तत्राऽपि हिन्दूनामेव तत्राऽपि द्विजानामेव श्रद्धेया भाषेति सीमितया सङ्कीर्णया च दृशाऽवलोकयन्त्विति।

किञ्च– जातुचित् भवन्तं कर्मकाण्डह्रासं समीक्ष्याऽन्तर्दोदूयमानस्य वेदमुद्दिधीर्षोः कस्यचन नृपप्रकाण्डस्य 'को वेदान् उद्धरिष्यति' इति दुःखोद्गार इव संस्कृतविषये ममाऽप्यस्ति साम्प्रतं पद्यनिबद्धोऽश्रुपूर्णोऽयं दुःखोद्गारः–

'त्रास्यन् विश्वं मिथोवैरात् निर्देक्ष्यन्नेकनीडताम्[1]
अर्वाग् वीरो मनीषी क उद्धरिष्यति संस्कृतम् ?' इति

हन्त! किं मूल्यं ममाऽस्य दुःखोद्गारस्य? न मम हस्ते शक्तिपूर्णा सत्ता, यतः शासनबलेनाऽपि संस्कृतभाषामनिवार्यप्रयोजनां सर्वातिशायिनीं कर्तुं शक्नुयाम्! न कोषेऽपरिमिता सम्पत्तिः, यतो दानैर्विविधसौविध्यप्रदानैश्च संस्कृतभाषायां रुचिं प्रवृत्तिं च जनानामानेतुं शक्नुयाम्! न वा विश्वपरिचितं प्रभावशालि वैदुष्यव्यक्तित्वम्, यतो विश्वस्य निर्मातॄणां विधायकानां वा व्यक्तिविशेषाणां श्रुतिपथे स्वमुद्गारं प्रापयितुं शक्नुयाम्!

परम्, विचारान्तरेण समीक्षिते संस्कृतभाषाया एवं शोचनीयां दशां समीक्ष्याऽपि, भृशमन्तर्विदूयाऽपि शक्तिसाधनहीनो व्यक्तित्वहीनश्च मादृशः साधारणो जन इतोऽधिकं किं वा कर्तुं शक्नोति? यतः– मामकीनोऽयमश्रुपूर्णोद्गारः स्वतन्त्रं भारतवर्षम्, अत्रत्यान् हिन्दूव्यपदेश्यान् मुनिसन्तानान्, राष्ट्रनिर्मातॄन्, राष्ट्रविधायकान्,

---

१ यत्र विश्वं भवत्येकं नीडमित्यौपनिषदिकीं भावनामित्यर्थः।

राष्ट्रनायकान्, राष्ट्रविदुषश्च स्वत्व-गर्वगौरवशून्यान् प्रमाणीकृत्य नूनं परिहसति, तेषां सांस्कृतिकीः क्लीबताः, अशक्तीरुपेक्षाभावांश्चोद्-घाटयति च विश्वसभ्यसमक्षमिति मन्ये फलवानेवाऽस्ति ममैष दुःखोद्गारः । अथवा तथाऽसम्भवेऽपि 'यात्रा त्वेषा यद् विमुच्येह वाष्पं प्राप्ताऽनृण्या याति बुद्धिः प्रसादम्' इति कवितल्लजस्य तत्र भवतो भासस्य सूक्त्यनुसारमेवं हीनावस्थां मातरं संस्कृतभाषां प्रति चिन्तामावहन्त्या मम बुद्धेरानृण्याद् दुर्निवारैव ममाऽन्तरिकी शान्ति-रिति सत्यमफलवत्त्वं दुर्वचमेव तस्य !

तथा च– एतदस्ति विज्ञानयुगम् । विश्वमेवाऽस्ति साम्प्रतं गृह-प्राङ्गणायितम् । अधुना भाषाऽतिरिक्ता अन्यान्या अपि सामाजिक्यः, सांस्कृतिक्यो नैतिक्यो वा नवा नवा विश्व–समस्या भूयोभूयः सन्ति समाधेयाः, याः कर्तव्यमूढा महामहत्तमानां युगपुरुषाणां पावनानि दर्शनानि, जगद्धिताः कृतीश्च आशिश्रीषन्ते ! अत एतेषामेकत्र प्रकाश-नीयतां साधीयसीमहममन्ये । यत आशास्यते—-सर्वेषामपि महापुरु-षाणाम् दर्शनम् भिन्नगतिकमपि विश्वशान्त्येकप्राप्तिकम्, विश्वमानव-समुदायहितकरमिति चेति, तथा वृथा वादसङ्घर्षो वस्तुतो विश्वहि-तान्तराय इति च पाठकाः सम्यग् बुध्येरन्, बोधयेयुश्चेति,–यत् विश्व-मानवसमाजस्य सदस्यत्वेन भावनीयं कर्तव्यं च भवति । एतत्प्रदर्शनमेव लक्ष्यं ममाऽस्य प्रयासस्य । प्रदर्शनप्रकारस्तु सर्वसमक्षमेवाऽस्ति । अत्रो-च्चनीचम् यद् भवेद् भवत्येव क्षन्तव्यम् विदुषाम् !

केचन आलोचका विद्वांस एतत् सङ्कलनमेवं दूषयन्ति–'क्व साक्षाद् भगवतो मानवावतारभूतो मर्यादापुरुषोत्तमः श्रीरामः ? तथा 'कृष्णस्तु भगवान् स्वयम्' इति विद्वत्कीर्तितमहिमातिशयः क्व साक्षाद् भगवान् श्रीकृष्णः? क्व च तदपेक्षया प्राकृताः समाजसेवाव्याजेनैव यथाकथमपि मर्त्यसंख्यामतिवर्तमाना लिङ्कनलेनिनगान्ध्यादयः ? एतेषां समेषामेक-पङ्क्तौ प्रतिष्ठापनं न विवेकोचितं न वा न्यायोचितमिति' । अत्र ममाऽस्त्युत्तरम् । ये तथाऽलोचयन्ति,ते तु विद्वांसोऽन्यविद्वत्तादृष्ट्या मम

नमस्कार्या एव । परमत्र प्रसङ्गे लालाटिकताभावनायाः, दासभावनाया वाऽपरपर्यायां तथाकथितां[1] भक्तिभावनां प्रति विश्वासरहितमात्मानमेव प्रथममहं धिक्करोमि, येन दोषेण तादृक्षाणां विदुषां समविचारेण, समदृष्टिकोणेन चाऽहं चिराय वञ्चितोऽभवम्! मम क्षुद्रविचारे त्वीशामसीह-मुहम्मदलिङ्कनलेनिनगान्धयः सत्यं नियतिहता वराका व्यक्तिविशेषा आसन्, ये विश्वमानवसमुदायस्य कृते तथाऽतिमानवं त्यागं तपश्च कृत्वाऽपि, आजीवनं तथा प्रयस्याऽपि व्यासवाल्मीकिसदृक्षान् स्वस्तावकान् प्रगल्भविदुषस्ते नाऽलभन्त ! यथा महाभागौ रामकृष्णौ अलभताम् !

एतावता न मम तयोर्मानहानेर्विधित्सा ! यौ मम पूर्वजोपक्रमे संस्कारे, साँस्कृतिके परिवारे, हृदये, गृहपूजाप्रकोष्ठे, मन्दिरे मन्दिरे तु साक्षादीश्वरावेव स्तः । न तत्र केषाञ्चिदप्याधुनिकदृष्टिमतां किङ्कर्थंप्रश्नः सह्योऽस्ति मम । यतोऽयं मे विश्वमानवसमानो वैयक्तिको विश्वासोऽन्येषां हस्तक्षेपं नैव सासह्यते । परमेवं सत्यपि मद्विश्वासेऽस्माकं तथा विश्वासाश्रयौ रामकृष्णावन्ये पाश्चात्या न जातुचिदीश्वरत्वेन भावयिष्यन्ति, तथा न च पौरस्त्या वयमीसामसीहमीश्वरपुत्रत्वेन, मुहम्मदं वेश्वरदूतत्वेन। नैवाऽत्र केषाञ्चिदपि स्वपक्षे, स्वविश्वासे वा मूढाग्रहः सर्वसम्मतः । न च विपक्षाणां समालोचकदृशि रामकृष्णयोरीश्वरत्वं प्रमाणयन्ती विद्वद्विश्वासावहा काचिदुपपत्तिस्तर्को वा व्यासवाल्मीकिसविधेऽस्ति, ऋतेऽस्मद्विश्वासात् । तथेसामसीहस्येश्वरपुत्रत्वम्, मुहम्मदस्येश्वरदूतत्वं च प्रमाणयन्त्यो न काश्चिदक्षरपङ्क्तयस्तद्धर्मग्रन्थेषूपलभ्यन्ते, ऋते तत्पक्षीयविश्वासोद्रेकात् । कामं शास्त्रवादो मां परिहसतु नाम ! परं व्यवहारजगति तु बुद्धिवाद एव ममाऽपि सुतरां दीपायते सर्वेष्वर्थदर्शनेषु । आलोचका विद्वांसः सूक्ष्मेक्षिकया यत्पश्यन्ति, तदेव स्पष्टं कथयन्ति । स्वयं विश्वस्याऽपि, सम्यगवबुद्ध्याऽपि स्वाग्रहरक्षार्थं सदपि वस्त्वन्यथयित्वा कथनं सत्यं स्वात्मन एव प्रवञ्चना भवति ! अयमेव हि सतामसह्य आत्मापराधो नाम । तत् सत्यं

---

१ तथाकथिताम् = प्रबोधरहितामित्यर्थः ।

वक्तव्यम्– एतत् समीक्षणं परिष्कृतमस्ति । तथाऽपि व्यासवाल्मीकि-विश्वाससंक्रान्तोऽस्मत्संस्कारोऽद्यावध्यपि वशीकरोत्यस्मानित्यहो, ! तयोर्महाकव्योर्लोकोत्तरा प्रतिभा ! कवित्वशक्तिः! वाचामाकर्षकता ! इति जातुचित् स्मारं स्मारं रहस्येकाकी विस्मयसागरेऽहं निमज्जामि । न ज्ञायते–कदा स्यादुन्मज्जनम् ? इति । तथाऽप्यहमाशालम्बनजीवनः प्रतीक्षेतमाम्– 'आद्यन्तवन्तौ, पुराणौ, बृहन्तौ, सूक्ष्मौ, अनुशासितारौ, कवी, हृदयविश्वाससंवेद्यौ तावेव भगवन्तौ रामकृष्णौ मां कदा वा सानुग्रहं भिन्नहृद्ग्रन्थिं, छिन्नसर्वसंशयं च कुर्याताम् ?' इति । आस्तां वैतत्, प्रकृतमनुसरामि । स्वयं जगद्गुरोर्भगवतः श्रीकृष्णस्य यावद्-विभूतिमत्सत्वेषु तत्तेजोंऽशप्राकट्यनिर्देशात् तथा विभूतिमत्सत्व-सम्पन्नेषु तेष्वीसामसीहादिष्वपि मम तत्तुल्यप्रतीक्षभावस्तन्मूलकस्तेषां रामकृष्णसमानपङ्क्तिसन्निवेशश्चैतद् द्वयमेव नाऽनौचित्यमावहतीति सत्यं नाऽहं स्तोकमप्यपराध्यामीति मे विश्वासः । किञ्च न तावदत्रा-ऽतिमानवानां तेषां व्यक्तित्वानां मूल्याङ्कनप्रसङ्गः । अत्र त्वन्योऽस्ति प्रसङ्गो मार्गगवेषणायाः संस्कृतस्य विष्वक् प्रचाराय । तदर्थे संस्कृ-तानुरागिभिः केवलमेवं गेहनर्दिभिर्मातृशासितैरेव च नो भवितव्यम् । तत्सर्वप्रथमं व्यापकेनाऽसभ्यतान्धकारेण भ्रान्तस्य मानवजगतो विश्वना-गरिकधर्मालोकेन सभ्यतापद्धतिं निर्दिशन्त्याः संस्कृतभाषाया उपासकै-रेवं वक्तव्यम्, कर्त्तव्यं च, यद् विश्वजनसमुदायमावर्जयति, निकटयति, उपकुरुते च । विश्वमानवसङ्घटनं भेदयतः कस्यचिदपि वर्णस्य, लिङ्गस्य, धर्मस्य, सम्प्रदायस्य, जातेर्वा नैव जातुचित् पक्षग्राहमाग्रहः कर्तव्यः । 'वसुधैव कुटुम्बकम्, यत्र विश्वं भवत्येकं नीडम्' इत्येतदेव हि तैः सदा भावनीयम्, तदनुसारं कर्तव्यं च । तदनुकूलं समेष्वौदा-र्यम्, उपयोगित्वम्, औचित्यं च प्रदर्श्य स्वीयो दृष्टिकोणः, सिद्धान्तः, आदर्शश्च विश्वसभ्यसमुदायसमक्षं संस्कृतभाषायामुपस्थापनीयास्तैः । तत एव हि संस्कृतस्य विश्वजनीनता सेत्स्यति, तत्प्रचारप्रसारमार्गश्च निर्बाधं विस्तृतो भविष्यति । तत एव च स्वनामधन्यानाम् महानिर्ग्र-न्थानां विश्वहितचिन्तनसम्पादनैकलक्षाणामस्माकं पूर्वजानामत्रिभृगु-

वसिष्ठादीनां प्रातःस्मरणीयानामृषीणामुत्तराधिकारं रक्षितुं वयं समर्था भविष्यामः । अन्यथा संस्कृतभाषा भारतवर्षीयाणामङ्गुलि-परिगणनीयानां केषाञ्चित् संस्कृतभक्तानां द्विजानामेव श्रद्धायां सीमिता भविष्यति । तथात्वे न केवलं भारतवर्षस्य, हिन्दूनाम्, द्विजानामेवाऽपितु विश्वमानवसमुदायस्य, व्योमवद्विशालाया विराजो मानवसंस्कृतेर्मानवधर्मस्य मानवतायाश्चाऽपूरणीया क्षतिर्भविष्यति, विश्वबन्धुताया विश्वशान्तेश्च भावनाया मूलप्रभवे प्रलयङ्करोऽकालवज्रपातश्च !

किञ्च– अत्राऽपि कश्चित्तार्किको मां बलवदभियातुं शक्नोति– 'विश्वमानवसङ्घटनं भेदयतः कस्यचिदपि वर्णस्य, लिङ्गस्य, धर्मस्य, सम्प्रदायस्य, जातेर्वा नैव जातुचित् पक्षग्राहमाग्रहः कर्तव्य इति कथयता भवता विश्वमानवसङ्घटनं भेदयतां भवदुक्तानां वर्णलिङ्गादीनां विषयाणां क्रमे भाषायाः समावेशः किं नो विहितः ? साऽप्येकतमाऽस्ति तस्य भेदकानां विषयाणाम् ! सन्ति हि दरीदृश्यमाना इतिहासपृष्ठेषु भाषा-निबन्धना मिथोवैरसङ्घर्षाः समाजगताः परःशताः । वर्तमानजगत्यपि ते प्रत्यक्षं यत्र तत्र साक्षात्क्रियन्त इति नाऽस्ति तत्र प्रमाणान्तरगवेषणावसरः । तद् वर्णलिङ्गादीनामाग्रहवद् भवतः संस्कृतभाषाग्रहोऽपि न दोषैर्विनाभवितुं शक्नोति' इति ।

कायेन, मनसा, वाचा चाऽकृत्वैवाऽपि किञ्चित्पापं प्राक्तनदुरितवशादेव धिक् किमाकर्ण्यते ! किमयमपि वैदुष्यसमुचितः कश्चित् प्रश्नोऽस्ति भवतः ? किं संस्कृतभाषा कस्यचिद् वर्गविशेषस्य जातिविशेषस्य समाजविशेषस्य राष्ट्रविशेषस्य वा काचित् पृथग् भाषाऽस्ति ? तेषां जातिवर्णलिङ्गसम्प्रदायादीनामिव किं तथैव सीमितः परिधिरस्ति संस्कृतभाषायाः ? यस्याः समादरादन्यः कश्चित् पक्षो विमनायेत, वैरायेत वा ? अज्ञानग्रस्तमेतं प्रश्नं क्षणमपसार्य तावद्ब्रवानुत्तरयतु– विश्वमानवैकताम्, तन्निबन्धनां विश्वशान्ति वा भवान् कामयते न वा? यदि नो कामयते–भवदीयं तर्कं गल्पमसत्प्रयोजनं च मत्वा स्वस्याऽनर्घ-

समयस्याऽन्यत्र सदुपयोगायाऽस्माद् वादादेवाऽहं सद्यो विरमामि । किंवा यदि तां कामयते भवान् हृदयेन, तर्हि दीयतां मत्प्रश्नस्योत्तरम्—समस्तस्य विश्वमानवसमाजस्यैकतासूत्रे सङ्घटनाय शक्तिशालिनी, निष्पक्षा, निर्विपक्षा, सर्वादरणीया, सम्पन्ना, सगौरवा, विश्वशान्तये विश्वबन्धुतायै च सोद्घोषा सनिर्बन्धा च संस्कृततेतरा का वा भाषा विश्वस्मिन् लब्धुं शक्यते ? नाऽहं स्वस्य मातृभाषायां राष्ट्रभाषायां वा ममताहीन एवं ब्रवीमि । अस्तितमामेव विश्वसर्वजनसहजः स पक्षपातो ममाऽपि तयोः । परं कोऽर्थस्तेन पक्षपातेन ममतया वा ? मम भवतोऽन्यस्य वा मातृभाषां राष्ट्रभाषां वा कोऽन्यो विदेशीयः समाजो वर्गो वा तथा सम्मन्येत ? कच्चित् सम्भवेदेतत् ? तथा सम्मानदापनाय किमस्ति भवत्यन्तःसाहसम् ? तर्हि तु भवान् द्यावापृथिव्यावनायासं योजयितुं शक्नोति ! समुद्रं पीत्वा शोषयितुं शक्नोति ! पृथ्वीमेव वा कवलीकृत्य चर्वयित्वा जारयितुं शक्नोति । इतः किमाश्चर्यमित्यलमतिविस्तरेण !

राजन् ! रुमायां लशुनस्य कोऽर्थः ?' एतादृशप्रश्नापेक्षया तु किञ्चित्ससारमिव किन्तु तात्विकदृष्ट्या ततोऽपि साकल्येनैव निःसारमेतादृक्षं प्रश्नं कुर्वन्तो भवादृशाः शिक्षितब्रुवाः प्राय एवंविधाः परिगणिता उपलभ्यन्ते—

(१) ये संस्कृतं न पठन्ति । अन्यभाषामाध्यमेन किञ्चिल्लब्धवर्णा विद्वद्भिर्महत्वपूर्णे गहनविषय ईदृशे वादाय दुःसाहसं कुर्वन्ति । वस्तुतः संस्कृतस्य महत्वमेव न जानन्ति ।

(२) य आङ्ग्लभाषाविद्वांसः सन्ति । परमनधीतविषयत्वात् संस्कृतस्याऽत्मनि लघुताभासात् संस्कृतं तद्विदुषश्च प्रतिचिकीर्षन्तोऽवबुध्याऽपि यद्वातद्वा जल्पन्ति ।

(३) ये प्रथमं संस्कृतमधीत्य तत्राऽसफलाः सरलामाङ्ग्लभाषां तदुपाधिं च शरणीकृत्याऽत्मनो भग्नलक्ष्यत्वमुदरपूर्त्येकलक्ष्यकं नैयून्य-

पूर्णमस्तित्वं च गोप्तुम् संस्कृतविषयकं विशालं कार्यक्रमं जानन्तोऽपि वृथा वाग्दम्भैः खण्डयन्ति दूषयन्ति च ।

(४) ये राष्ट्रस्य सांस्कृतिकभ्रष्टाचारिणो राष्ट्रान्तरकोषतोऽगणितं कूटनीतिकमर्थसाहाय्यं गुप्तं प्राप्य स्वराष्ट्रस्य सांस्कृतिकेषु प्रतीकेषु, तदाधारायां संस्कृतभाषायां चाऽनास्थामविश्वासं चोत्पादयितुं विद्वत्स्वपि सवितण्डं स्वं तर्कमेवं प्रचारयन्ति ।

(५) येऽज्ञानवशादपि बुभुत्सयैवं पृच्छन्ति ।

(६) ये च निर्दोषाः परमार्थतः कलत्रपुत्रसंरक्षणैकलक्ष्या विश्वभावनासदृक्षे महत्वपूर्णे हीदृशे विषये स्वां मस्तिष्कशक्तिमेव नोपयुञ्जते । केवलं प्रसङ्गे स्वप्रतिष्ठारक्षणाय वाचं मिश्रयन्ति । इत्यलं बहुना ।

किञ्च–वाचनसुगमतायै (वस्तुतः संस्कृतप्रचारसौविध्याय) पद्यशब्दानामपि प्रायः सन्धिपृथक्कारेण दर्शनम् मम व्यसनमिवाऽस्ति यथा महाकाव्ये सत्यहरिश्चन्द्रेऽपि । वस्तुतो मया सन्धिनियमपालनावकाशं संरक्ष्यैव पद्यशब्दाश्छन्दोबद्धाः कृता भवन्ति । ये कस्यचिदपि वाङ्मयस्य सामयिकताम्, उपयोगिताम्; कलां, साहित्यं च सर्वाण्यप्युपेक्ष्य व्याकरणकठोरनियमपालनमेव कृतिसर्वस्वं, विद्वत्तानिकषं वा मन्येरन्, दयनीयधियस्ते सन्धिनियमयोगेनैव मत्पद्यानि पठेयुरित्याशासे । अन्यथैतदप्यनन्तरविचारणीयमस्ति––देशस्य राष्ट्रियसङ्घटनस्य संभाव्यसाधनैकतया, यया सम्पत्त्या (भगवत्या संस्कृतभाषया) अस्माकं देश इतरेतरेभ्यः सौभाग्यशाल्यस्ति, तस्या उन्नतिविकासाय, प्रचाराय च तदन्तरायौ, शैलीकाठिन्यं, नियमकाठिन्यं च नाऽस्माभिः साम्प्रतमाग्रहणीये, तथा कृते जनप्रवृत्तिवैरल्यात् सान्धकारो भावी संस्कृतेतिहासो नूनमस्मभ्यमन्ततः शप्स्यतीति मेऽस्ति लघ्वी धारणा ।

अन्ते च– अस्य प्रथमं संस्करणम् तदानीन्तनप्रधानमन्त्रिण: श्रीमतो मातृकाप्रसादस्य (कोइराला) साहाय्येन सम्पन्नमासीत् । एतच्च सम्पत्स्यमानं द्वितीयं संस्करणं सर्वकारस्य संस्कृतिविभागस्य गुणग्राहितापूर्णेन साहाय्येन भवदस्तीत्यहं तं प्रति विशेषत: कृतज्ञोऽस्मि । जयतु संस्कृतम् !

–लेखक:

निर्देशिका

प्रत्तमेवाऽमृतं तैस्तैरस्मभ्यममरात्मभिः
तथाऽपि न वयं हन्त ! मृत्युं लङ्घयितुं क्षमाः !

-लेखकः

सकृदेव प्रपन्नाय तवाऽस्मीति च याचते
अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम !

—श्रीरामः

श्रीरामः

युगं त्रेताऽस्ति यज्ञस्य
प्रचारोऽस्ति, प्रजाः समाः
    वर्णाश्रमरताः सन्ति
    प्रायः, शान्ता विमत्सराः

आर्यावर्तस्य राज्यानाम्
नेतृत्वं सूर्यवंशिनः
    भूपाः कुर्वन्ति, तेऽयोध्याम्
    शासति न्यायभूमयः

तदाऽपि राक्षसो, दैवो
द्वौ वादौ द्रुह्यतो मिथः
    शोषणात्मा पूर्व आसीत्,
    भरणात्मा च पश्चिमः

राक्षसो दक्षिणोद्भूतः
प्रसर्पन् दैववादिनाम्
धर्माऽरण्येषु, राज्येषु
भूयोभूयः प्रबाधते

अशान्तिरस्ति सर्वत्र
गृहस्थाः, तापसा अपि
जनशान्त्यै महः किञ्चित्
प्रार्थयन्ते नभोदृशः

सत्यध्येयस्य लोकस्य
संयुक्ता प्रार्थनैव हि
बोभूयते निराकारा
रूपरेखा भविष्यतः

मूर्ता काचित् दिव्यशक्तिः,
रूपिणी विश्वधारणा !
अवाततार कौसल्या-
गर्भतो धरणीतले !

राज्ञो दशरथस्याऽन्त-
र्हृदयात् हर्ष उद्गतः
हर्म्यं साकेतमवनीम्
च क्रमात् व्याप तत्क्षणात्

बालकेल्या स्वपितरौ,
सौराज्यस्याऽऽशया महीम्
हर्षयन् ववृधे रामो
लोकोद्धारधिया सह

रामो मारीचमुत्क्षिप्य,
शुद्धीकृत्य च गौतमीम्
कौमारात् स्वस्य लक्ष्यस्य
सूत्रपातं भुवि व्यधात्

माहेशं धनुरुत्तोल्या–
ऽवधीर्याऽसङ्ख्यभूपतीन्
रामः पर्यणयत् सीताम्
मूर्तां शक्तिमिवोज्ज्वलाम्

मूढक्रोधम्, जीर्णधियम्
जामदग्न्यं स वर्त्मनि
विघ्नन्तं क्षत्रियान् त्रातुम्
तेजसैव व्ययोजयत्

दुष्टान् उन्मूल्य संसारम्
शान्तौ नेतुं दृढाऽऽशयः
रामो राज्यं तृणीकृत्य
भ्रात्रा, पत्न्या वनं गतः

निषादं गुहमालिङ्ग्य
वने दाशरथिः परम्
समदर्शित्वमादर्शम्
प्रथमं लोकमादिशत्

चित्रकूटे सन्निवर्त्य
भरतं स स्वमान्तरम्
निःस्वार्थित्वं, लोकसेवा-
भावं च समदर्शयत्

निघ्नन् मूर्तान् तपोविघ्नान्
इव तान् रक्षसां गणान्
दण्डके शान्तिमतनोत्
तापसानां स मानसे

बन्धुघातात् पराभूतः
स्वाभिमानी स रावणः
प्रतिक्रियाधिया सीताम्
अहरत् विजने वनात्

स वनेचरराजेन
सुग्रीवेण मिलन्, बृहत्
बलसंवर्धनं कृत्वा
पौलस्त्यं ह्यभ्यषेणयत्

सकुलं रावणं हत्वा,
कृत्वा भूमिमकण्टकाम्
सर्सीतालक्ष्मणोऽयोध्याम्
पुष्पकात् स निवृत्तवान्

रामरावणयोर्युद्धम्
सृष्टेः सा घटनाऽऽदिमा
मानवात् प्रथमो यत्र
देवयोनेः पराजयः

ततोऽयोध्याराज्यपीठे
स्थितो धर्म्यमनुत्तमम्
राज्यं चकार श्रीरामो
मर्यादापुरुषोत्तमः

न्यहन् तापसशंबूकम्,
अत्यजच्च सतीं प्रियाम्
समदर्श्यपि, विज्ञोऽपि
स लोकमतगुप्तये

न तस्य राज्ये कोऽप्यासीत्
अल्पायुः सामयोऽधनः
न वा धर्मपरिभ्रष्टो
न वा न्यायप्रवञ्चितः

युगस्तोमा ययुः, किन्तु
रामः, तस्य च शासनम्
द्वे एवाऽदर्शरूपेण
लोकेऽद्याऽपि प्रजीवतः !

चराचरस्य लोकस्य
स्थितये, विश्वभूभुजाम्
आदर्शः स स्वमन्तव्यम्
एवं लोकाय दत्तवान्––

"चराचरमयं सर्वम्
जगदेतत् परात्मनः
मायायाः प्रबलो मिथ्या-
विलासः प्रतिबुध्यताम्

पुरातनः सुखमयः
सर्वगः स्वयमातपः
आत्मा न जन्म मरणम्
वृद्धिं ह्रासं च गच्छति

अनाद्यविद्योत्पन्नायाम्
हि बुद्धौ प्रतिबिम्बितः
चेतनस्य प्रकाशो यः
स जीव इति कथ्यते

आत्मन्यस्मिन् सुखमये
संसारस्याऽसुखात्मनः
प्रतीतिरज्ञानवशात्
अध्यासात् एव जायते

नृणां मायामोहवशात्
स्वात्मभावो भवेत् तनौ
नेतीत्यनात्मके वस्तु-
जाते ज्ञाते स नश्यति

अज्ञानमेव जीवानाम्
भवेत् संसारकारणम्
तन्नाशश्च भवेत् ज्ञाना-
देव, न त्वन्यकर्मभिः

प्राप्तुकामैः अपि ज्ञानम्
आदौ तु स्वान्तशुद्धये
सर्वैः सम्यक् अनुष्ठेयाः
यथावर्णाऽश्रमं क्रियाः

यथागमं कृतेनाऽपि
कामस्पृष्टेन कर्मणा
नृणां न रागः क्षयति,
नचाऽज्ञानं प्रणश्यति

ज्ञानं स्वतन्त्रमेवाऽस्ति,
तत् जीवः स्वस्य मुक्तये
न कानिचन कर्माणि
स कदाचित् अपेक्षते

मोक्षोपाये ज्ञानपथे
प्राप्तुकामैः सर्मेर्जनैः
लौकिको व्यवहारोऽपि
कर्तव्यः सुनिरूपितः

विजित्य शत्रुषड्वर्गम्,
नियम्येन्द्रियवाजिनः
असक्तं कर्म कुर्वाणाः
प्राप्नुवन्तीश्वरान्तिकम्

मुमुक्षुणा मनुष्येण
सर्वत्र समताहृदा
चराचरं जगत् सर्वम्
द्रष्टव्यम् हीश्वरात्मकम्

दुष्टान् निर्मूल्य, शिष्टानाम्
रक्षार्थं ह्यात्मजीवनम्
नयं, तत्रैव वर्वर्ति
साफल्यं जीवितस्य नः

गुरोराज्ञा, लोकसेवा,
सत्यं, धर्मो जगद्धितः
एकपत्नीव्रतं चाऽपि
पालनीयानि मानुषैः

राज्यं प्रजार्थं, तत् राजा
प्रजानामेव भूतये
बलं, कोषं, पदं, स्वार्थम्,
सुखं चाऽपि समर्पयेत्

सकृदेव प्रपन्नाय
तवाऽस्मीति च याचते
अभयं सर्वभूतेभ्यः
प्रदेयं मद्व्रतं यथा !"

स्पृहाहीनम् अनासक्तं स्वकर्तव्यधिया कृतम्
यत् कर्म, तत् न बध्नाति पुरुषं समदर्शिनम् ।

—श्रीकृष्णः

श्रीकृष्णः

द्वापरोऽस्ति युगम्, सन्ति
प्रान्तप्रान्तेषु भारते
आर्यराज्यानि, राजानो
मिथः सन्ति समत्सराः

सामाजिकः स आदर्शो-
ऽधः पतन्नस्ति सर्वतः
अहम्भावोऽस्ति मर्त्येषु
बन्धुत्वमपि विस्मरन्

शक्तिसञ्चारधीर्घोरम्
उद्भवन्त्यस्ति राजसु
क्रमशः शिथिला चाऽस्ति
लोके वर्णाऽऽश्रमस्थितिः

यज्ञिया भावना मन्दी–
भवन्त्यस्ति, ततस्ततः
प्रविशन्तो विलोक्यन्ते
ब्राह्मणाः संसृतिस्थितौ

'कथं वृत्तिः, कथं मोक्षः
सपत्नैः !' इति धारणा
जयन्त्यस्ति मनुष्याणाम्
सतीम् अध्यात्मधारणाम्

अहम्मन्या राज्यलुब्धाः
क्रूराः क्षत्रियबन्धवः
बाधमानाः प्रजाः शान्ता
अशान्तिं तन्वते भुवि

सर्वान् उन्मूल्य तान्, एकम्
धर्म्यं राज्यं परं जनाः
अनिशं भावयन्ते स्म
शान्तये, स्थितये हृदा

अन्यतो वंशदोषस्य
कंसस्य क्रूरशासनात्
मथुरा–राज्यलक्ष्मीः सा
रोदिति स्म प्रजाहृदा

वन्दीकृतस्तेन भूपः
उग्रसेनः प्रजाप्रियः
सपत्नीको ग्राम्यनता
वसुदेवश्च निष्ठुरम्

मूढैः शठैः पशुबलैः
स्वमल्लैर्मुष्टिकादिभिः
अभयः स करोति स्म
कंसो राज्यविडम्बनाम्

मथुरायास्तथा भूमे-
रेव तां तां तमःस्थितिम्
जिहीर्षतीव, जगते
दित्सतीव नवां सृतिम्-

किञ्चित् लोकोत्तरं ज्योतिः
काराम् एव प्रकाशयत्
शिशुरूपेण देवक्याः
स्वर्णकुक्षेरजायत

जिघांसितोऽपि कंसेन
गोकुले स्मयते स्म सः
कथं विद्यात् स[1] तत् जालम्
गुप्तं विद्रोहिणो विधेः !

---

१ स कंसः ।

सा वात्सल्यमयी माता
यशोदा कृष्णमर्भकम्
प्राप्य, प्राप्तं निजोत्सङ्गे
मेने त्रैलोक्यवैभवम्

[१]संसारिणः कति स्वर्गे,
संसारे स्वर्गिणः कति
प्रापुस्तदा हि कृष्णस्य
बालकेल्या विचित्रया !

दीनां व्रजस्थितिं, यत्र
तत्र राज्ञो विभीषिकाम्,
वन्दिनौ पितरौ जानन्,
शृण्वन् कृष्णः समेधत

श्रमस्य स्वोपयोगाय,
शक्तिसंवर्धनाय च
स प्राक् गोपवयस्यान् स्वान्
नवनीतान्यहारयत्

ततो गव्यैः पुष्टगात्रान्
गोपीर्गोपान् वनाद्वने
क्रीडयन्, वेणुगीतेन
बोधयन् ऐक्यमानयत्

---

१ संसारिणां तृणावर्तादीनां भगवद्धस्ततो मरणात् स्वर्गप्राप्तेः, स्वर्गवासिनां देवानामपि भगवत्साहाय्यायाऽवतीर्णानां गोपादिरूपेण संसारित्वप्राप्तेश्चेति भावः ।

लोकोद्धारपरैस्तैस्तैः
चरित्रैर्भूरिविक्रमैः
प्रभाविताः समे गोपाः
मेनिरे तं स्वनायकम्

इतो जनमतं, कूट–
नीतिरन्यत्र, कालतः
सङ्घर्षोऽभूत् कंसराज्यम्
स्मृतिशेषमभूत् क्षणात्

उन्मोच्य पितरौ, ताश्च
प्रजाः कंसस्य शासनात्
दीर्घलक्ष्यः स विश्वस्य
समस्यासु मनो दधे

असङ्ख्याः पीडिता देशाः,
असङ्ख्या दस्यवो नृपाः
स समं तान् धूलयितुम्
क्षेत्रमेकं व्यचारयत्

देहलीराज्यसत्ताऽसीत्
तदा कुरुषु, तेषु च
भेदः, तमेव विश्वस्य
क्रान्तिक्षेत्रं स निर्ममे

एकमुत्तेजयन्, अन्यम्
भेदयन्, जातु पक्षयन्
सोऽकल्पयत् महाभीमम्
युद्धं कौरवपाण्डवम्

रणाऽरम्भे बोधयितुम्
अर्जुनाय स मुह्यते
ददौ गीतां, ययाऽलब्ध
विश्वमेव नवां दृशम् !

पक्षग्राहं दृप्तदुष्टान्
क्षत्रधूर्तान् नियोधयन्
भुवो भारेण सार्धं तान्
निःशेषान् अकरोत् हरिः

एकच्छत्रं धर्मराज्यम्
देहल्याम् समयोचितम्
संस्थाप्य कृष्णः स युगम्
नवीनं पर्यवर्तयत्

स्वस्यैव व्यपदेशेन
साऽहन्तान् यादवान् च सः
अघातयत् मिथो विश्व-
स्थित्यै संसारबान्धवः

एवं स वीर्यमार्जन्या
निरस्यन् दोषसङ्करान्
पृथ्वीं दिव्यपरिष्कृत्या
शुद्धां रम्यां सकृत् व्यधात्

गता पञ्चसहस्राब्दी,
चरित्रैः किन्त्वसौ महान्
पुरुषोऽद्यापि मर्त्यानाम्
स्मृत्यां, भक्त्यां च जीवति !

विश्वोद्धाराय, धर्माय
युगविप्लवकारिणः
अचिन्त्यशक्तेः कृष्णस्य
सन्देशोऽस्त्येवमर्हितः---

"धर्म एव हि संसारे
मन्यते सर्वतो महान्
तेन प्रवर्तनं नृणाम्
कर्तव्यं जायतेऽनिशम्

धर्ममार्गाः सन्ति नाना,
परं ते कामधेनुवत्
श्रिताः सर्वे भवन्त्येव
नृणाम् कामप्रपूरणाः

तत् नोच्चावचता ग्राह्या
धर्मेष्वेकप्रलब्धिषु
परं स्वधर्मः श्रद्धेयः,
पालनीयश्च शान्तये

कर्मक्षेत्रेऽत्र संसारे
सर्वं मानवजीवनम्
कर्मण्येवाऽधारितं, तत्
न त्याज्यं कर्म मानवैः

अस्मिन् जीवनसङ्ग्रामे
पुरुषोचितया धिया
वीर्येण चाऽमूः स्थितयः
समाधेया नवा नवाः

कृतं कर्म फलत्येव
शुभं स्यात् अथवाऽशुभम्
मनुष्यो म्रियते, किन्तु
न तत् नश्यति कर्हिचित्

एतत् कर्मरहस्यं, यत्–
न कैश्चिदपि कर्मभिः
बन्धो भवति, स त्वस्ति
फलेच्छायां हि केवलम्

न राज्यत्यागतस्त्यागो
मुक्तिर्वा मनुजन्मनाम्
इन्द्रियाणां समनसाम्
संयमात् सोऽथ सा भवेत्

स्पृहाहीनम्, अनासक्तम्,
स्वकर्तव्यधिया कृतम्
यत् कर्म, तत् न बध्नाति
पुरुषं समदर्शिनम्

निमित्तम्मन्य ईशस्य
कर्तृत्वे विश्वसन् नरः
तदर्पणधिया कुर्वन्
तमेव हि निषेवते

जयं, पराजयं चैकम्
मत्वा लोकस्य गुप्तये
ईशप्रीत्यै दुष्कृतिभि-
र्योद्धव्यं कर्मयोगिभिः

सद्गुप्त्यै, दुष्टसंहृत्यै,
धर्मसंस्थापनाय च
धरातलेऽवतरति
पर आत्मा युगे युगे !"

शुध्यत्यात्मा नोपवासैः, न व्रतेन न भस्मना
स विशुध्यति बोधेन, परार्थेन च कर्मणा !

—म. बुद्धः

म. बुद्धः

सार्धं सहस्रद्वितयम्
हायनानां गतं यदा
नृसमाजं खण्डयन्ति
जात्याद्या विविधा भिदाः

सर्वत्र वातावरणम्[1]
अस्ति रूक्षं, मिथःस्मयम्
अस्ति मर्त्यजगत् येन
मुहुः स्वात्मनि साऽमयम्

संविदः संविदाभासः,
कर्माभासश्च कर्मणः
तत्त्वं विलुम्पतो धीरम्
कारणं लोकशर्मणः

---

१ लोके प्रचलनबाहुल्यात्, संस्कृतकोषसमृद्धये चाऽस्य शब्दस्य प्रयोगः समुचितः ।

संयमं ससदाचारम्
निगिलन्निव सर्वतः
विद्वत्स्वपि यदा मिथ्या–
ऽऽडम्बरोऽस्ति विजृम्भितः

विस्मारयति सत् तत्त्वम्
शुष्कस्तर्को हि वादिनाम्
प्रतारयति कल्याणम्
रूढिश्रद्धा प्रपञ्चिनाम्

नानारूपाः स्वार्थधियः
प्रसरद्भोगवासनाः
पिबन्त्यः सन्ति बलवत्
नृणाम् अध्यात्मधारणाः

निरागसां पशूनां तैः
क्रन्दितैः, रुधिरेण च
बीभत्स्या यज्ञवेद्यस्ताः
क्रन्दन्ति च रुदन्ति च

सधनेन, सधान्येन
याजमान्येन तुष्यतः
ब्राह्मणान् वीक्ष्य नैराश्यात्
कर्मवादोऽस्ति चिन्तितः

उपवासकृशाः केचित्
केचित् पञ्चाग्नितापिनः
तपः स्वयं विहसति
दर्शं दर्शं तपस्विनः !

मीमांसन्ते वेदविधीन्
एकतो ह्यन्धकर्मठाः
अन्यतो भौतिकान् वादान्
कत्थन्ते नास्तिकाः शठाः

किं राज्यं, कः समाजो वा
नाऽसीत् मानवता क्वचित्
विश्वात्मा तां याचते स्म
नीरवं यत्रकुत्रचित्

विश्वकोलाहले तस्मिन्
तस्मिन् सद्धर्मविप्लवे
गौतमः प्लववत् जातः
संसाराब्धौ हि निष्प्लवे–

नेपाले, विमले शाक्य-
कुले, कपिलवस्तुनः
राज्ञो 'माया' धर्मराज्ञ्याम्
अध आरामशाखिनः

तमुत्पाद्यैव जननी
माया तेन कृतार्थिता
विरक्तिं तस्य सहजाम्
इवोद्बोधयितुं मृता

बह्वचो विद्या अगृह्यन्त
काले तेन, परं समाः
प्राक्संस्कारात् इव ज्ञाता
मेनिरे न नवोद्गमाः

जिज्ञास्या काऽपि तस्याऽसीत्
विद्या सा, यत्र तत्तृषा
आसीत् बलवती ज्ञात्वा
सर्वा भोगतृषा मृषा

अजिघृक्षत् नृपः पुत्रम्
नानाभोग्यैः प्रकल्पितैः
अमुमुक्षत् गौतमस्तु
दुःखान्तैः क्षणिकैश्च तैः

तत् राज्यं, स प्रियः पुत्रः,
स्ववर्मा सा यशोधरा !
गौतमः परिवव्राज
लिप्सुर्भूतीरनश्वराः

क्षिप्त्वा प्रसाधितान् केशान्,
राजवेषं च गौतमः
वनं प्रविष्टो ददृशे
मूर्तो त्याग इवाऽदिमः !

जीवमात्रानुकम्पा सा
स त्यागश्च समाहितः !
मर्त्येतिहासः सकलः
आसीत् ताभ्यां हि गर्वितः

गौतमो गृध्रशिखर–
गुहां यमिपवित्रिताम्
जिज्ञासुराश्रयत्, प्राप–
च्चाऽलार्कस्य स शिष्यताम्

एवं वनात् वने भ्रान्तो
तापसात् तापसान्तरम्
प्राप्तवान् नैव कुत्राऽपि
लक्षितं स स्वमान्तरम्

कालात् सपञ्चशिष्यः सः
उरुबेलवने गतः
वर्षषट्कं सोपवास–
स्तपति स्म व्रतस्थितः

निष्फलं तत् तपः प्रोचे
तं– 'हेतुः सर्वसम्पदः
देहो न साधकैः क्लेश्यः,
सैष पन्था न संविदः!

तत् तं देशं, विधिं चाऽपि
त्यक्त्वा सपदि बोधये
निरञ्जनातटेऽश्वत्थम्,
क्रमं चाऽन्यं स शिश्रिये

अन्यः सङ्कल्प इतरा
प्रतिज्ञाऽन्यच्च साहसम् !
तत्र सत्यं तस्य तपो–
ऽकम्पयत् क्ष्मां, विहायसम् !

पूर्णता मानवधियः,
पौरुषस्याऽन्तिमा गतिः !
एकदा निशि तस्याऽभूत्
प्रवेशः सहसा चिति

यत्राऽणुरपि नो शोको,
नो मोहो, नाऽपि वेदना
यत्राऽनुभूतौ लभ्यन्ते
ह्यमेयाः सुखकल्पनाः

यम् लोकम् उद्धरिष्यन् सः
प्राव्रजत् विगतैषणः
तदर्थेऽमृतमादायो-
पागच्छत् सविधे पुनः

तमोमयान्, मोहसुप्तान्,
मर्त्यान् बुद्धरविस्ततः
प्रबोधयितुमारेभे
नेपालोदय-शृङ्गतः

प्राक् समाजोन्नतं भागम्
बिम्बसारादिकं, ततः
अन्यांश्च क्रमशो व्याप
बोधांशुस्तत्प्रसारितः

के ब्राह्मणाः केऽन्त्यजा वा,
के पुमांसोऽथवा स्त्रियः !
सर्वोदारोऽस्य सिद्धान्तो-
भवत् सर्वजनप्रियः

ग्रामात् ग्रामं भ्रमन्, धर्मम्
बोधयंश्च जनाज्जनम्
निनाय विश्वबन्धुः सो-
ऽशीतिवर्षं स्वजीवनम्

अन्ते च कुशिनारायाम्
तले सालस्य शाखिनः
निर्वाणमभवत् तस्य
गौतमस्य महात्मनः

संसारिणः समुद्दिश्य
चकारैवं स देशनाः––
"सर्वेषाम् अपि दुःखानाम्
मूलं भवति वासना

वासना चाऽपि बलवत्
अज्ञानमुपजीवति
तत् अज्ञानक्षयात् एव
मनुष्यः सुखमृच्छति

पारेप्रपञ्चमेवाऽस्ति
सुखं, यत्र रजः शुचः
रागा द्वेषाः कामनाश्च
स्तम्भन्ते, संक्षयन्ति च

भ्रमोऽयं यत् जगत् दृष्टम्
ससारमिव भासते
ज्ञातं तु तत् दुःखमयम्
क्षणिकं चाऽनुभूयते

तत् तृष्णां जहि, जात्याद्याम्
कल्पितां तां भिदां त्यज
सदाचारं तथा सत्यम्
अहिंसां च सदा भज

योग्यतायाम् श्रेष्ठताऽऽस्ते,
नैवाऽस्ते जातिजन्मनोः
स ब्राह्मणो यो भवति
साधको ज्ञानकर्मणोः

शुध्यत्यात्मा नोपवासैः,
न व्रतेन, न भस्मना
स विशुध्यति बोधेन,
परार्थेन च कर्मणा !

भोक्तव्यमेव हि फलम्
मनुष्यैः स्वस्य कर्मणः,
शुभेन कर्मणा नाऽन्तो
भवत्यशुभकर्मणः

मनुष्यो न स यः प्राणि-
मात्रे न करुणायते
बलिप्रथा समुच्छेद्या,
या व्यामोहात् प्रवर्तते

अक्रोधेन जय क्रोधम्
दुष्कृतं सुकृतेन च
        मर्त्यजातिं भ्रातृदृशा
        पश्य, स्निह्य, क्षमस्व च

बुद्धं, धर्मं च सङ्घं च
शरणीकुरु रे जन !
        मुमुक्षोरत्र शरणम्
        इतरत् नाऽस्ति किञ्चन"

त्यज प्रतिक्रियाबुद्धिम्, कश्चित् चेत् वसनं तव
हरेत्, तर्हि द्रुतं तस्मै स्वभूषां च समर्पय !

—म. ईसामसीहः

म. ईसामसीहः

गतं सहस्रद्वितयम्
वर्षाणां, प्रायशः समे
सन्ति पाश्चात्यभूभागाः
शासने रोमवासिनाम्

तदा हि यूरोसलमे
काहनाः क्रूरभावनाः
अत्याचरन्ति, जनताः
पीडयन्ति च निष्ठुरम्

तदा मुख्यः शासकश्च
हेरोडेसोऽतिनिष्ठुरः
पापो निरङ्कुशश्चाऽस्ति
धनमानेन गर्वितः

मुखे नीतिः, करे दण्डः !
स्वार्थाय, स्वमुदे च सः
सर्वतन्त्रस्वतन्त्रः सन्
दलति स्म प्रजा भृशम्

आविलोऽस्ति तदा लोको
विविधैरन्धकर्मभिः
एकः परं न सहते,
को विद्यात् प्रेम किं भवेत् !

एवं स्थितौ, युसूफस्य
धर्मपत्न्या 'मरीयमात्'
प्रवासे, वैतलहमे
मसीह उदपद्यत

दिव्यप्रोज्ज्वलया कान्त्या,
लक्षणैश्च विलक्षणैः
दर्शका भावयन्ति स्म
तं बालकमलौकिकम्

'हेरोडेसं' तदा कश्चित्
एवमूचे –'मृतिस्तव
भविष्यति हि कस्माच्चित्
वीरात् यहुदिबालकात्'

श्रुत्वा तत्, क्रोधसम्भ्रान्तो
हेरोडेसो यतस्ततः
उपद्विहायनान् बालान्
परोलक्षान् अघातयत्

युसूफो बैतलहमात्
मिस्त्रं, मिस्त्रादपि क्वचित्
प्रवसन् पुत्ररक्षायै
स प्रापत् विपदः कति !

परं परेण यत्किञ्चित्
करणायेव नोदितः
स बालो नृपतेर्दौष्ट्यैः
अस्पृष्टः समवर्धत

हेरोडेसे मृते पत्नी–
पुत्राभ्यां सह, निर्भयः
न्यवर्तत स्वस्य देशम्
युसूफः समयान्तरे

बाल्यात् मसीहे धर्मस्य
रुचिरासीत् स्वभावतः
भजते स्म स तत् स्थानम्
चर्चा यत्रेशधर्मयोः

कश्चित् तमोगुणो देवो
मसीहं निर्जने वने
पर्यैक्षत स्खलयितुम्
तं तत्सिद्धान्तवर्त्मनः

सोऽत्रासयत् ह्यनशनैः,
विश्वराज्यैरलोभयत्
परं मसीहः स्वपथात्
व्यचलत् नैव निःस्पृहः

ततो मसीहो नगरे
नगरे, धर्ममन्दिरे
प्रचारयितुमारेभे
स्वमतं धर्मतत्त्वदम्

अनेन प्रासरत् तस्य
ख्यातिः सर्वत्र निर्मला
श्रद्धालूनां श्रावकानाम्
प्रत्यहं वृन्दमैधत

स प्रेम्णि, भ्रातृभावे च
धर्मसत्तामुपादिशत्
तत् तस्मै दुद्रुहू रूढेः
भक्ता मन्दिरपूजकाः

स्थितः पक्षे निर्धनानाम्
आढ्यपक्षं स आक्षिपत्
तत् [1]स प्रहृतलक्ष्यस्तम्
अदिधक्षत् हृदो रुषा

द्वादशाऽसन् तस्य शिष्याः
याकूब- यहुदादिकाः
विष्वक् प्रचारयन्ति स्म
ये तन्मतमनुत्तमम्

आसीदेवं गुरोराज्ञा-
'विघ्नतस्वपि विरोधिषु
क्वचित् न प्रतिकर्तव्यम्
अङ्गेन मनसा गिरा !'

तत् मतस्य प्रचाराय
ते सहन्ते स्म निर्व्यथम्
विरोधिनां मुहुर्हेलाम्,
स्थ्यूतं च सकशाहति

प्रचारो व्याप सर्वत्र,
ख्याता तस्य महात्मता
तत्सर्वप्रियतां सोढुम्
नाऽलं तस्य विरोधिनः

---

१ स आढ्यपक्षः ।

तत् मसीहं निहन्तुं ते
काहना रूढिवादिनः
धर्माध्यक्षाश्च तच्छिद्रम्
मार्गयन्ति स्म नित्यशः

कस्य हृत् को विजानीते !
त्रिंशद्रूप्यकलोभतः
तस्य शिष्योऽस्करयुतिः
अमिलत् हन्त ! शत्रुभिः

सैष पाषाणहृदयो
नाना च्छिद्राणि सूचयन्
अबन्धयत् रक्षिगणैः
स्वगुरुं विजने स्थितम्

अभियोगश्चैवमासीत्
तस्मिन्–'सम्राट्पदे स्पृहाम्,
तदर्थे राज्यविद्रोहि–
प्रचारं चाऽकरोत्' इति

लत्ताभिः, मुष्टिभिः, पाशैः
ताडयन्तश्च काहनाः
मसीहं वन्दिनं चक्रुः
निर्दोषमपि शासकैः

राज्यात् [1]ईद-समारोहे-
ऽपि कश्चित् नरघातकः
वन्दी मुक्तो, महात्मा सः
प्राणदण्डाय सज्जितः !

विहसन्तो भर्त्सयन्तः
ताडयन्तश्च वर्त्मनि
घातुका निष्ठुरात्मानः
प्रापयन् तं वधस्थले

यथाशक्यं विलम्बेन,
दायं दायं च पीडनम्
विश्ववन्द्यं महात्मानम्
तं न्यघ्नन् धर्मवैरिणः

अन्तकालेऽपि धीरोऽसौ
महात्मा व्योमदृक् परम्
[2]प्रार्थयत्-'मम हन्तॄणाम्
दोषोऽयं क्षम्यताम्' इति

एवं क्रौर्यमये ध्वान्ते
संसारे मधुरं स्थिरम्
प्रेमदीपं समुद्दीप्य
स महात्मा दिवं गतः

---

१ ईद इति तेषां महत्पुण्यपर्वदिनम्।
२ प्रार्थयन्ति शयनोत्थिताः प्रिया इतिवत्।

विश्वभूत्यै स धर्मस्य
तत्त्वमेवम् उपादिशत्--
"उपासनीयो भगवान्
एव मर्त्यैः स्वभूतये

प्रेमैव विद्धि तद्रूपम्,
प्रेमैव हि तदास्पदम्,
प्रेमैव रोचते तस्मै,
प्रेम्ण्येव स विराजते

तत् ईश्वरं प्रीणयितुम्
इच्छता र्यहि कर्हिचित्
मर्त्यजातौ भ्रातृधिया
कर्तव्यं प्रेम निश्छलम्

त्यज प्रतिक्रियाबुद्धिम्,
कश्चित् चेत् वसनं तव
हरेत्, तर्हि द्रुतं तस्मै
स्वभूषां च समर्पय

नो कदापि व्यभिचर,
चेत् त्वन्नेत्रे परस्त्रियम्
पश्येताम्, तत् स्फोटय ते
आत्मनोऽन्याङ्गशुद्धये

स्वस्य मित्रे तु यः कोऽपि
करोति प्रेम, तत् सदा
स्वस्मै विद्रोहकेऽपि त्वम्
विधेहि प्रेम हार्दिकम्

दानं कुरु, परं तच्च
दक्षिणेन करेण चेत्
प्रदत्तं, नैव जानीयात्
स्वस्यैवाऽदक्षिणः करः

भङ्गुरो वितथश्चाऽत्र
कृतो वित्तादिसङ्ग्रहः
तदत्र विहितस्त्यागः
परत्र स्वाम्यभाक् भवेत्

अन्यायिनः, शक्तिमतः
पीडनात् त्राहि निर्बलान्
ततो द्राक् त्वं परेशस्य
प्रीतिपात्रं भविष्यसि"

ईश्वरोऽस्ति न 'कावायाम्', न मूर्तौ न च दिङ्नमे
स चकास्ति भ्रातृभावे, दयायां स्वात्मनोऽर्पणे !

म. मुहम्मदः

म. मुहम्मदः

एशियायां, दक्षिणस्याः
पश्चिमायाश्च मध्यतः
उपगतं फारसस्य
ह्युपरक्तमहोदधि––

नद्या नदैः फुरातायैः
परितः परिवेष्टितः
उच्चावचाऽचलमयः
वनहारित्यमञ्जुलः–––

अरबो नाम देशोऽभूत्
प्राक् कदाचित् सुसभ्यतः
सुसमृद्धश्च विविधैः
कलाशिल्पैः, तथोद्यमैः

मूर्तिपूजा–प्रथा नाऽसीत्,
नचाऽन्या अन्धरीतयः
सभाजेऽन्तर्व्यलसताम्
सुखं, शान्तिश्च नित्यशः

कालेन तस्य सकला
नष्टास्ताः सभ्यताः, कलाः
तमाक्रासन् क्रमात् दैन्यम्
अशिक्षाऽन्धपरम्पराः

अरबीया अविद्याऽन्धा
विस्मृतप्राच्यगौरवाः
निमग्ना मूर्तिपूजासु
तथाऽन्यास्वन्धरीतिषु

नराणां बलिभिः हुबल–
लाताद्या मूर्तिदेवताः
तेऽर्चित्वा प्रार्थयन्ते स्म
हितं [1]स्वस्याऽहितं रिपोः

आसन् प्रभ्रश्यतां तेषाम्
एता एव विशेषता[2]:–
व्यभिचारो, द्यूतसेवा,
मद्यसेवा, मिथःस्मयः

---

१ सामान्यात् संबन्धे षष्ठी ।
२ प्रचलनबाहुल्यात् ।

विस्मरन्तश्च ते स्वीयाः
प्राच्याः शिल्पकला वने
ऊष्ट्रान् अजान् चारयन्तः,
भ्रमन्तः कालमक्षिपन्

स्वल्पेऽपि कारणे द्वेषम्
कुर्वन्तस्ते स्ववैरिणः
हासं हासं क्षिपन्ति स्म
ज्वलने ज्वलदुल्मुके

तदातनाश्च कवयो
हित्वा सामाजिकीं धियम्
लेखैरुन्निद्रयन्ति स्म
समाजे युद्धचेतनाम्

समाजे न प्रतिष्ठाऽऽसीत्
सतीनाम् अपि योषिताम्
ता अस्मर्यन्त यन्त्राणि
सजीवानीव कर्मणाम्

देशेऽतिशोचनीयाऽऽसीत्
अवस्था राजनीतिकी
अशान्तिः, अव्यवस्था च
नृत्यतो यत्र कुत्रचित्

एतादृशे दुःखमये
समयेऽरबपत्तने
मक्कायां, हाशिमे वंशे,
द्वितीयदशके शुभे–

विक्रमस्य शताब्द्या हि
सप्तम्या, भाग्यशालिनः
अब्दुलाहस्य भार्याया
आमनायाः सुगर्भतः–

चराचरस्य जगतो
नियन्तुर्जगदीशितुः
वहन् अमरसन्देशम्
अजायत मुहम्मदः

पितुर्दर्शनसौभाग्यम्
नैव स प्राप्तवान्, यतः
तत्पिता प्रययौ स्वर्गम्
यदाऽसौ गर्भसंस्थितः

परम्पराऽनुसारेण
तन्माता पुत्रवत्सला
[1]'बद्दू' स्त्रियै हलामायै
मासिकं तं शिशुं ददौ

१ बद्दूनामा कश्चित् जातिविशेषोऽरबीयः ।

स चतस्रः समाः 'बद्दू'–
स्त्रिया पालितपोषितः
प्रत्यानीतः पुनर्मात्रा
स्वोत्सङ्गे स्नेहमेदुरे

मदीनां स्वं मातृगृहम्
प्राप्य प्रत्यागता पथि
माताऽपि स्वर्गता, त्यक्त्वा
तं बालं प्राणवत्सलम्

पित्रा, मात्रा वियुक्तं तम्
योऽरक्षत्, तत्पितामहः
सोऽप्येनमष्टवर्षीयम्
त्यक्त्वा दैवात् दिवं गतः

ततः स्नेहमयात् स्वस्य
पितृव्यात् अबुतालिबात्
प्राप्तसंरक्षणो बालो
वर्धते स्म मुहम्मदः

ऊष्ट्रान्, अजान् चारयित्वा,
कूर्दित्वा सखिभिः सह
खेलित्वा च निजं बाल्यम्
निनाय स मुहम्मदः

मृतद्विभर्तृकाम् अर्ध-
वयस्काम् खदिजाभिधाम्
स्वासक्तां पर्यणैषीत् स्वाम्
स्वामिनीं तरुणोऽपि सः

काले मृतायां तस्यां च
तद्विवाहा नवाऽभवन्
आसन् नवैव तत्पत्न्यः
आयशा, सफियादयः

चत्वारिंशद्वर्षदेश्यः
स जिब्राइल-वाक्यतः
अन्तःस्फुरद्धर्मतत्त्वो
विश्वोद्धारे मनो दधे

मुहम्मदः प्राक् प्रारेभे
[1]मक्काया अन्धपूजकान्,
यात्रिणश्च समाख्यातुम्
धर्मतत्त्वं जगद्धितम्

अनेकदेवपूजानाम्
आचाराणां च दम्भिनाम्
खण्डनात् रूढिविश्वस्ताः
तं व्यरुन्धन् कुरैषिणः

---

१ मक्केति यवनानां तीर्थस्थानविशेषः ।

तेषां दृढोऽन्धविश्वासः
क्रमात् क्रोधात्मतां गतः
तं व्यापाद्यैव सत्तां स्वाम्
चक्रमे परिरक्षितुम्

स्वं हन्तुं रजनौ स्वस्य
गृहम् एवाऽभियास्यताम्
कुरैषिणां मतं बुद्ध्वा
प्रतस्थे मदिनाम् असौ

तत्राऽपि स्वात्मरक्षायै
सशस्त्रो रूढिवादिभिः
कुरैषिभिः, यहुदिभि-
श्चाऽजस्रं स न्ययुध्यत

सदा स आत्मसन्देहः,
तत् निराशामयं तमः !
प्राचारयत् तथाऽप्येको-
ऽरण्यक्रन्दितवत् मतम्

त्यागेन श्रमिणस्तस्य
तपसा, साहसेन च
इतस्ततस्त्या इस्लामम्
धर्मं बुबुधिरे क्रमात्

क्रमात् विरोधिनो नष्टाः
प्रवृद्धा अनुयायिनः
अरबीयाः समे दध्युः
'इस्लामम्' एकसूत्रिताः

तदा तस्य नवान् दिव्यो-
पदेशान् अरबप्रजाः
अस्थिन, चर्मणि, वस्त्रे चो-
ल्लिखन्ति च पठन्ति च

धर्मग्रन्थो मुस्लिमानाम्,
सन्देशो विश्वमङ्गलः
यत् कुरानम्, तदस्यैव
ह्युपदेशसमुच्चयः !

स्वजीवनेऽरबान् एक-
धर्मसूत्रे निबध्य सः
एकराष्ट्रे च सङ्घट्या-
ऽपूरयत् लक्ष्यमात्मनः

इस्लामात्म नवं ज्योतिः
एवं विष्वक् प्रसारयन्
त्रिषष्टिवर्षदेशीयः
स महात्मा दिवं गतः

तथा गतेऽपि तन्मूर्तिम्
ताम् 'इस्लाम'यशोमयीम्
    अद्याऽपि साक्षात्कुरुते
    विश्व–मुश्लिमसन्ततिः

दीर्घलक्ष्यः, सत्यदृढः,
सरलः, परमेशितुः
    भक्तः, शान्तिप्रियश्चाऽसीत्
    महात्मा स मुहम्मदः

मक्कां त्यक्त्वा, यदा सोऽयं
प्रतस्थे मदिनां प्रति
    'हिज्रि' संवत्सरारम्भः
    तत एवाऽत्र कथ्यते

स लोकान् एवमाचष्ट––
'मर्त्यान् उद्धर्तुमीश्वरः
    काले काले प्रेषयति
    स्वदूतं पृथिवीतले

सोऽहं तस्यैव दूतोऽस्मि,
युष्मान् उद्धर्तुमागतः
    ममोपदेशं शृणुत,
    तद्वच्चाऽचरताऽचिरम्

ईश्वरोऽस्ति प्रकाशात्मा,
आस्तिके नास्तिके च सः
वर्तते समभावेन,
क्षमते, करुणायते

कस्मैचित् इष्टलक्ष्याय
कौशलेन महीयसा
जगत् विनाऽप्युपादानम्
कारणं सृजतीश्वरः

ईश्वरोऽस्ति न कावायाम्,[१]
न मूर्तौ, न च दिङ्नमे
स चकास्ति भ्रातृभावे,
दयायां, स्वात्मनोऽर्पणे

मनुष्याणां कर्मसाक्ष्यम्
करोति परमेश्वरः
स्वर्गे वा नरके याति
जीवः स्वस्यैव कर्मणा

इह जीवः स्वकार्यस्य
फलभोगं न विन्दति
परत्र फलभोगाय
परतन्त्रः स जायते

१ काबा=अरबस्थं धर्ममन्दिरम् ।

[1]धर्मस्कन्धान् सोम–सलात्–
जकात्–हज्जान् स्वशक्तितः
प्रतिपालय तैरेव
मानवात्मा विशुध्यति

दरिद्रान् भर, रोगार्तान्
शुश्रूषस्व, भिदां त्यज,
समं वर्तस्व सर्वेषु,
तत ईशः प्रसीदति

गृहलक्ष्मीर्मातृजातिः
अवहेल्या न कर्हिचित्
तत्स्वातन्त्र्यं च न च्छेद्यम्
परेशं प्रीणयिष्यता !

---

[1]सोमः= 'रमजमा' मासे (यदा कुरानम् अलिख्यत)उपवासः ।
सलात्= प्रार्थना (नमाजपाठः) ।
हज्जः= नियतसमये काबा–यात्रा ।
जकात्= दानम् ।

न्यायदृष्टौ सन्ति तुल्याः सर्वे एव हि मानवाः
दासं वा हीनमितरं न कोऽप्यर्हति वीक्षितुम् !

—श्रीअब्राहमलिङ्कनः

श्रीअब्राहमलिङ्कनः

ऊर्नविंशी शताब्द्यस्ति,
स्वसत्तां पात्यमेरिका
सङ्घीयसर्वकारान्त-
र्ग्रथिताऽनेकराज्यका

प्रजातन्त्रप्रणाल्यस्ति,
किन्तु सन्ति समे विशः
अत्यक्तपूर्वसंस्काराः
आढ्याश्च प्रगतिद्विषः

अल्पोऽस्ति पारिश्रमिको-
ऽतिमात्रोऽस्ति च स श्रमः
तङ्क्ते ते परोलक्षाः
दासाः स्वस्वामिपीडिताः

पृष्ठेष्वजागर्तिमताम्
आरूढा राज्यवासिनाम्
प्राप्नुवन्ति पदेषूच्चैः
आढ्या औदार्यशत्रवः

गर्वन्ते ते, किन्तु राष्ट्र–
स्थितिरस्ति यथायथम्
अस्ति पीडैव सर्वत्र,
शान्त्यालोकोऽस्ति न क्वचित्

एवं स्थितौ ऊनविंश–
शताब्द्या दशकेऽग्रिमे
अमेरिकादक्षिणतो
राज्ये केन्टकिनामके–

साधारणगृहस्थः सः
पिता टामसलिङ्कनः
माता च नान्सिहान्साख्या !
जज्ञेऽब्राहमलिङ्कनः

कालचक्रं दुर्विभाव्यम् !
कुले सम्पत्तिशालिनि
जातस्याऽपि हि तस्याऽसीत्
तदा गेहं दरिद्रितम्

एकवर्षोत्तरं वर्ष–
षट्कं बालो नवक्रिके
निन्ये, स ववृधे तत्र
स्थितिं दैन्यमयीं श्रितः

वयसा नवमं वर्षम्
श्रितस्याऽस्य समर्धयत्
दुःखक्लेशाऽनलं मातृ–
घाताऽज्येन विधिब्रुवः

पारेगव्यूति सदने–
ऽग्रजायाः समुपेत्य सः
अधीते स्म प्रतिदिनम्
अक्षराऽरम्भ–पुस्तिकाम्

तथा दुःखेन, दैन्येन
सार्धं पित्रा स वर्धितः
आसीत् बालोऽष्टवर्षोऽपि
युववत् सारवत्तनुः

व्यवहत् कन्यकामन्याम्
तत्पिता, या सहायिका
आसीत् अब्राहमस्यैव
जीवनोन्नतये सदा

सच्चरित्रः सुजिज्ञासुः
स एकादशहायनः
इतिहासान् दर्शनानि
चाऽध्यगीष्ट सचिन्तनम्

स फ्राङ्क्लीन--जेफर्सन्-
प्रभृतीनां शुभाः कृतीः
पठन्, स्मरन् समुत्सेहे
वाढं राष्ट्रसिषेविषुः

'भाव्यं सङ्घर्षशीलेन
लक्ष्यसाफल्यमिच्छता'
इति जज्ञे जर्जवासि-
गटनस्य कृतेश्च सः

स मन्यते स्म [1]तं मित्रम्
परमं, योऽस्य पुस्तिकाः
देयात्, यतो मन्यते स्म
स ता अन्विष्टवस्तुदाः

महत्त्वाऽकाङ्क्षिणी तस्य
ध्यानमग्नस्थितिः पितुः
नाऽभूत् मोदाय पुत्रस्य
सम्पन्नत्वमभीप्सतः

---

१ तं जनम् इत्यर्थः ।

स ऐच्छत् कृषकं कर्तुम्
धनधान्यसमन्वितम्
न च तं शिक्षकं कर्तुम्
बहुज्ञानं [1]किमद्यकम्

किन्त्वन्याऽऽसीत् तत्प्रवृत्तिः
श्रमविश्रान्तये सुराम्
श्रयत्स्वन्येषु सध्यानम्
श्रयति स्म स पुस्तकम्

शालप्रांशू रूक्षकेशः
स आसीत् बलवत्तमः
भयशङ्काकारणेऽपि
कार्येऽविरतसाहसः

अकार्षीत् व्यवसायान् सः
ससाम्यं सार्ववर्णिकान्
एतेन तस्य वैशिष्ट्यम्
स्तूयते स्म जनातिगम्

स प्रापयत् मेक्सियोतः
न्यूअर्लीयन्सनामकम्
देशं यावत् स्ववस्तूनि
विक्रेतुं नाविकीभवन्

---

१ किम् अद्यम् किं भक्षणीयमिति यः सदा चिन्तयति, स किमद्यकः। 'किमद्यकानां ये लोका द्विषन्तस्तानवाप्नुयुः' इति महाभारतादौ प्रयोगदर्शनात् ।

वीक्ष्य न्यूर्ऑलियन्सस्य
पोतधान्यां स मेषवत्
विक्रयं गच्छतो दासान्
अभवत् व्यथयाऽऽकुलः

प्रावसत् स इलिन्वाय-
राज्ये, यत्र वयस्कताम्
मताधिकारिणीं प्राप,
तां मुक्तिं च पितुर्वशात्

वियद्गुणवसुक्षोणी-
मितैसाब्दे स भाषणम्
अकरोत् प्रथमं राज-
नीतिकं ग्रामसंसदि-

आसीत् सङ्गामननदी-
नाविकानां हिताय यत्,
स सार्वजनिकक्षेत्रे
एवं पदमवर्धयत्

जोनएलेनामकस्य
तार्किकस्योपपत्तितः
निग्रोदास्यविरुद्धस्तत्-
सङ्कल्पोऽभूत् बलान्वितः

बाउल्ग्रीनात् प्राप्तनीति–
शिक्षः प्राज्ञः स लिङ्कनः
अभूत् ईलीन्वायराज्य–
सभाया मतयाचकः

तदा सोऽदूषयत् तारम्
जनशत्रून् कुसीदिकान्,
सङ्गासने नाविकानाम्
अहितांश्च विधायकान्

[1]ब्लाकाऽनीताम् इलिन्वाय–
प्राप्तां जातिं ततो बहिः
कर्तुं तद्राज्यपालेन
सैन्यनेता व्यधायि सः

सा सावधिनियुक्तिस्तु
गता, बत ! वणिज्यया
निर्वाचनेन च क्रूरम्
प्रहृतः स व्यद्रूयत

कुर्वन् अध्यक्षताम् न्यूस–
लेमपत्रालयस्य सः
लघ्वीर्भृतीर्यथाप्ताश्च
निरुवाह स्वजीविकाम्

---

१ शकफक्सनामकानां जातिविशेषाणां पुराणः सङ्ग्रामप्रमुखो ब्लाक-हकनामा कश्चित् व्यक्तिविशेषः स्वां जातिं मिसिसिपीमार्गेण ईलिन्वायमानीतवान् । तां जातिं निष्कासयितुं तत्प्रान्तीयो राज्यपालः सङ्घटिते स्वयंसेनादले लिङ्कनं सेनापतित्वेन नियुक्तवानित्यर्थः ।

तस्य सर्वं वस्तुजातम्
हित्वाऽङ्गवसनं तदा
नीवीं लाभं च सङ्ख्याय
ह्युत्तमर्णैरगृह्यत

युगाऽनलवसुक्षोणी–
मितैसाब्दे स लिङ्कनः
निर्वाचितोऽभवत् राज्य–
विधानस्य हि संसदि

निर्वाचितो जीर्णवासाः
कथं गच्छतु संसदम्
हृद्द्राविण्येव तस्याऽसीत्
तदाऽप्यस्यार्ऽथिकस्थितिः !

ग्रास्तां सैषा स्थितिः, किन्तु
व्यक्तित्वेन महीयसा
निर्वाचितोऽभवत् भूयः
स राज्यविधिसंसदि

भाण्डालियातः स्प्रिङफील्डे
राजधान्या विधित्सया
प्रस्तावपारणात् सोऽभूत्
राज्येऽधिकजनप्रियः

ह्विग्दलेनार्पितबलः
स प्रारभत घोषितुम्
दासप्रथाया निन्द्याया
विरोधाय महीयसे

भूयो निर्वाचितः सोऽभूत्,
मेक्सिकोऽमेरिका च तम्
[1]अपश्यताम् मिथःसृष्टे
सङ्घर्षे भूमिकारणे

अस्मिन् प्रसङ्गे सखिभिः
सार्धं ह्विगदलाश्रितैः
वैमत्यात् तस्य प्रस्तावो
विफलोऽजनि संसदि

चत्वारो बालकाः पुत्राः,
दरिद्रा भवनस्थितिः,
राजनीतेरसाफल्यम् !
अदूयत स लिङ्कनः

तस्मिन् अस्तमिते राज-
नीतिव्योम्नोऽत्र[2] दुर्दमः
दास्यं विरुन्धन् स जन-
प्रकोपः सुमहान् अभूत् !

१ तन्नीतिबुभुत्सयाऽपश्यतामित्यर्थः ।
२ अमेरिकायाम् ।

किन्तु [1]क्यान्ससचातुर्यात्
ह्विग्दले निर्बले सति
राजनीतौ लिङ्कनस्य
बलं भूयोऽभ्यवर्धत

फ्रीस्वाय्लर्सम्, प्रजातन्त्र–
दलं, ह्विगदलं च तैः[2]
त्रयं संयोज्यैकमेव
गणतन्त्रदलं कृतम्

'केवलं गौरजात्यर्थे
न्याय्या स्वातन्त्र्यघोषणा'
एवं प्रोचे डग्लसः सः
दास्यरीतिसमर्थकः

एतं प्रसङ्गमाश्रित्य
विधातुं वादसङ्गरम्
सत्यायुधो लिङ्कनः सः
समाह्वयत डग्लसम्

स्वीकृत्यैतत् डग्लसोऽपि
सप्तवारान् उपस्थितः
वादयुद्धेषु, किन्त्वेष
लिङ्कनात् सुपराजितः

---

१ क्यान्सस इति कश्चित् राजनीतिचतुरो व्यक्तिविशेषः ।
२ तैर्लिङ्कनसहितैर्व्यक्तिविशेषैः प्रतिनिधीभूतैरित्यर्थः ।

लिङ्कनो हेतुनाऽनेन
राष्ट्रेऽभूत् बहुविश्रुतः
दलस्य गणतन्त्रस्य
नेता चाऽखिलसम्मतः

संयुक्तराज्यसमिति-
निर्वाचनपराजितः
सफलोऽभूत् राष्ट्रपते-
र्महानिर्वाचने तु सः

स नैहत प्रलोभ्याऽन्यान्
सफलीभवितुं मृषा[1]
निर्वाचने, न चैहिष्ट
व्यवहारम् अनीतिकम्

धरण्यर्तुवसुक्षोणी-
मितैसाब्दे, जनप्रिये
तस्मिन् राष्ट्रपतौ र्जाज-
यादिकं राज्यपञ्चकम्-

संयुज्य संयुक्तराज्यात्
आत्मानमकरोत् पृथक्
तस्य दास्यप्रथोच्छेद-
नीतौ वैमत्यमाश्रितम् -

१ मृषेत्यस्य प्रलोभ्येत्यनेन सम्बन्धः ।

जेफर्सनो यदध्यक्षो-
ऽभवत् सङ्कीर्णदर्शनः
भवन्ति राष्ट्रे ईदृक्षाः
नायकाः, खलनायकाः !

अन्यत् राज्यचतुष्कं च
टेनिस्यादि तटस्थताम्
भेजे नीतिं स्वसङ्घीय-
सर्वकारस्य वीक्षितुम्

नवराष्ट्रपतेस्तस्य
शपथग्रहणोत्तरम्
स्वयं सृष्टाऽमेरिकायाम्
गृहयुद्धस्य भूमिका

नयनर्तुवसुक्षोणी-
मितैसाब्दे स राज्यतः
अकारयत् घोषणां च
दास्यमुक्तिप्रदायिनीम्

अग्न्यर्तुवसुभूसङ्ख्ये
ईसाब्दे समराङ्गणे
प्रोचे गेटसबर्गे सः--
'प्रजातन्त्रसमानते-

उद्दिश्यैव प्रवृत्तोऽयम्
सङ्गरो ज्ञायताम्' इति
अघोषीच्च स राष्ट्रस्य
निर्माणाय सशान्तये,

विद्रोहिणां समेषां च
क्षमाविश्वासदत्तये
राष्ट्राब्धौ यत उद्भूता
आशोल्लोला नवा नवाः !

स पृथग्भूतराज्यानाम्
सङ्गान्तर्योजनक्रमे
सफलत्वात् राष्ट्रपतेः
पदे निर्वाचितः पुनः

भूतर्तुवसुभूसङ्ख्ये
ईसाब्दे तत्प्रयासतः
निग्रोस्वातन्त्र्यप्रस्तावः
पारितः केन्द्रसंसदि

विशां सोऽन्धाग्रहः ! किं स्यात्
पारणात् तस्य, किन्तु तत् ?
कृतात्मना लिङ्कनेन
स्वं कर्तव्यं प्रपूरितम् !

भूतर्तुवसुभूसङ्ख्यः
स एवाऽस्ति हि वत्सरः
[1]चतुर्थमासस्य च सः
दिनाङ्कोऽस्ति चतुर्दशः

तस्मिन् अमेरिकाराष्ट्रे
गृहयुद्धेन जर्जरे
स्थितिं साधारणीभूताम्
प्रमाणयितुकामया–

तस्य राष्ट्रपतेः पत्न्या
मेर्या पतिहितेच्छया
आयोजितम् नाटकस्य[2]
भवदासीत् प्रदर्शनम्

तत् वीक्षितु राष्ट्रपतेः
परिवारोऽङ्गरक्षकाः
प्रायशो दलमुख्याश्च
तत्रैवाऽसन् उपस्थिताः

दृश्यमासीत् तथा हास्य–
प्रेरकं बलवत् तदा
येनाऽङ्गरक्षकास्तस्य
कार्यविस्मृतिबालिशाः–

---

१ आङ्गलवर्षस्य चतुर्थो मासः अप्रिलः ।
२ 'अमेरिकन् कजिन' इति नामकस्य ।

कुक्षिमर्दं साश्रुवाहम्
विहसन्तः सुमोहिताः
स्थानात् स्थानान्तरं प्राप्तान्
आत्मनो नैव जज्ञिरे

क्षणं तमुपयुञ्जानः
कश्चन क्रूरसाहसः
जनो 'जोन्विल्कसविथ्'नामा
साम्प्रदायिकचेतनः–

प्राहरत् तं राष्ट्रपतिम्
नलिकास्त्रेण सस्मयम्
सहाहाकारशोकेना–
ऽकुलयन् नाट्यमन्दिरम्

एवं प्रहारान्यदिने
राष्ट्रबन्धोः स्थिरात्मनः
लिङ्कनस्याऽभवत् मृत्यु–
र्विश्वमानवतापनः

तेन वीरात्मना स्वस्य
न्यायनिष्ठचरित्रतः
विश्वमर्त्यसमूहायो–
पदेशोऽयं विहापितः––

"के जङ्गमाः स्थावरा वा
वर्वर्त्येवाऽन्तरीश्वरः
तत् तत्साक्ष्ये विधेयानि
कर्माणीह भवन्ति नः

तत् सर्वत्र न्यायपक्षो
ग्राह्योऽस्माभिः सुधारकः
कामं लक्ष्यपथे साक्षात्
मृत्युरुद्भूय गर्जतु !

न्यायदृष्टौ सन्ति तुल्याः
सर्व एव हि मानवाः
दासं वा हीनमितरम्
न कोऽप्यर्हति वीक्षितुम्

प्रजातन्त्रं समाख्यातम्
तत् बहून्नतिकारकम्
यत् प्रजार्थे, प्रजाद्वारा,
प्रजाभिः परिचाल्यते

सजागरैर्जनैः सोऽयम्
पन्था जनमताश्रयः
रक्षणीयो बहुजन–
कल्याणैकसमाश्रयः"

केचित् स्वर्णस्य पल्यङ्के, शेषा धूलिषु वर्त्मनः
भूमौ न शान्तिर्न सुखम् विना त्वर्थसमानताम् !

—म. लेनिनः

म. लेनिनः

कालो युगपरिच्छेदः,
राज्यवादस्य लाञ्छनम्
प्रवर्तते जारराज्यम्
क्रूरनिष्ठुरशासनम्

दासप्रथाऽस्ति सर्वत्र
घोरा मानवतारिपुः
व्यापार्यन्ते च यन्त्राणि
स्वल्पस्वल्पानि कर्मसु

क्रीयन्ते हि जना यत्र,
विक्रीयन्ते च मेषवत्
तस्यां स्थितौ कथं वा स्यात्
विकासो हृद्युद्यमादिषु

जारराज्यं रुग्णमस्ति
क्रीमियाजौ पराजयात्
संत्रस्तमस्ति कृषकैः
विद्रोहाच्च क्वचित् क्वचित्

तत् यद्यपि क्षयन्त्यस्ति
नृशंसा दासपद्धतिः
तथापि कृषकेष्वस्ति
नैर्भूम्यात् दासवत् स्थितिः

[1]भूमीपतीनां क्षेत्राणि
कर्षन्ति कृषकाः, परम्
करेण दण्डेन भृशम्
ते शोष्यन्ते बुभुक्षया !

घोरा शरीरदण्डस्य
प्रथाऽऽस्ते, नग्ननिर्बलाः
कृषका लघुदोषेऽपि
ताड्यन्तेऽङ्गेषु वेतसैः

अत्याचारैर्भूपतीनाम्[2]
विह्वलाः कृषकाः स्वकम्
देशं त्यक्त्वा प्रयान्ति स्म
विदेशे वृत्तिकाम्यया

---

१ भूमिपतिः = जमिनदार इति भाषायाम् ।

२ भूपतीनाम् भूमिपतीनामित्यर्थः ।

कृषकाः श्रमिका वा ये
स्युस्तेषां स्वार्थगुप्तये
अधिकारो राजनीतौ
नैवाऽसीत् जारशासने

रूसे [1]रूसीतरासां च
जातीनां सकलस्थितौ
न कश्चित् अधिकारोऽस्ति,
तेन शोच्याऽस्ति तद्दशा !

रूसीतरासु भाषासु
शिक्षा, पत्रप्रकाशनम्
इत्यादि सर्वमेवाऽस्ति
निषिद्धं साम्प्रदायिकैः

यत्र तत्र प्रवृत्तानि
श्रमिकान्दोलनानि च
निष्ठुरं दमयन्ति स्म
निर्दया जारशासकाः

एवं क्रूरे शासनेऽपि
देशान्तः कोणकोणतः
उत्पद्यन्ते स्म निभृतम्
ते सङ्घा मार्क्सवादिनः

---

१ वन्येतराणां वनितासखानामिति कालिदासप्रयोगवत् बहुव्रीहि-समासात् ।

छिद्रयन्तो जारराज्यम्
दिशन्तो जनजागराम्
एंगेल्समार्क्सयोर्लेखाः
प्रचार्यन्ते स्म गुप्तितः

तथात्वेऽपि स्वदेशीयान्
धनिकान् गुप्तमाश्रितम्
नृजागर्तिविभीतैस्तैः
[1]अन्ताराष्ट्रैश्च वर्धितम्-

जारराज्यं साभिमानात्
स्वस्य न्यायात् निरङ्कुशात्
चलति स्म न, शस्त्राणि
प्रदर्श्य, विहसत् प्रजाः !

प्रदग्धात्मा, शक्तिहीना,
विवक्षुः, स्तोक-जागरा
सहते स्म प्रजाऽगत्या
हृत्कीलं जारशासनम्

तप्ता रुसमहाभूमिः
स्वप्रजार्थे तृषार्दिता
प्रतीक्षते स्म रक्तस्य
प्रपातं क्रान्ति-दुर्दिने

---

१ प्रचलनबाहुल्यात् ।

एवं हि वातावरणे
जनविक्षोभकारणे
जातो रूसस्य सिंविस्कें
उलियानाफ् स लेनिनः

विद्यालयाऽध्यापकस्य
स्वतातस्य प्रशिक्षणात्
स आसीत् बाल्यतो धीरम्
द्रष्टा, सूक्ष्मं विचारकः

उत्तीर्णवाक्कीलतोऽसौ
सदसद्ज्ञानभासुरः
अशोचत् चिन्तयन् देशम्
तथा दीनं, तथा नतम्

शिराशिरासु देहस्य
मार्क्सवादेन पूरितः
सोऽयं संलग्नवान् गाढम्
श्रमिकान्दोलने ततः

फेदोस्येफदले पूर्वम्
मार्क्सवादिनि सोऽविशत्
ततः स्वयं समारायाम्[1]
नवं सङ्घटनं व्यधात्

---

१ समारेति रूसस्य प्रदेशविशेषः ।

कालेन सेन्टपीटर्स–
वर्गं प्राप्य स्वपाटवात्
एकीकृत्य च तत्रत्याः
समितीर्मार्क्सवादिनीः–

तन्नेतृत्वं निर्वहन् सः
श्रमिकान्दोलनं महत्
प्राचालयत्, यत् व्यरुणत्
जारसत्तां हि निष्ठुराम्

'थार्टन्' यन्त्रालयस्थानाम्
श्रमिकाणां कृते चलन्
वन्दीकृतः स कारायाम्
निर्दयं जारशासकैः

कति वारान् एष एवम्
कारायां, कर्हिचित् स्थितः
विदेशे, कालपानीये
च लेभे दुःखयातनाः

परं स निर्जरोत्साहः
कर्मयोगी बहिःस्थितौ
कार्यतः, वन्दितायां च
लेखैर्लक्ष्यमुपागमत्

कर्मठोऽसौ प्रवासाच्च
[2]इस्क्रायाः ज्वलदुल्मुकैः
[1]नीवीवादं, जार-राज्यम्
चाऽदन्दह्यत निर्ममम्

पित्रोग्राडे रास्पुटिने
हते न्यायालयाऽधिपे,
अन्नाऽभावात् प्रजावर्गे
विद्रोहाय सचेष्टिते-

उदारे नेतृवर्गे च
वन्दीभूते, प्रकम्पितः
स्वाऽत्याचारात् स्वयं त्रस्तो
जारो राज्यासनं जहौ

प्रास्थाप्यताऽस्थायि राज्यम्
प्रजातन्त्रस्य नाम्नि
यत्र बाह्यसुधारार्थी
करेन्स्किः प्रमुखः स्थितः

लेनिनस्यैव निर्देशात्
सत्यं हृत्सु प्रबोधिताः
ददृशुर्जनता धूर्तम्
करेन्स्किं छद्मवेषिणम्

---

१ नीवीवादः- पूँजीवादः इति भाषायाम् ।
२ इस्क्रेति क्रान्तिकालिकी बोल्सेविकदलस्य मुखपत्रिका ।

तदा पीटर्सवर्गस्थः
लेनिनः ट्रात्स्किना सह
क्रान्तेः सङ्घटनं चक्रे,
निष्फलं यदभूत् तदा

यतः ट्रात्स्किर्मध्यवर्गम्
नेतृत्वायाऽन्वमन्यत,
लेनिनः श्रमिणां वर्गम् ,
तत् वैमत्यं तयोरभूत्

अन्ते लेनिननेतृत्वात्
प्रबुद्धं, प्रबलं च तत्
साम्यवादि दलं शक्ति
करेन्स्कोर्निरमूलयत्

ततः प्रणाल्या नवया
विश्वमेवोत्कयत् भृशम्
रुसे साम्ये जिगमिषु
प्राचलत् श्रमिशासनम्

ततो रुसमहाकाशे
काला दैन्यघटा गता
प्रोज्ज्वला श्रीः समुदिता
लेनिनेन महात्मना[1]

---

१ हेतौ तृतीया ।

संसारस्य व्यवस्थित्यै
सभूत्यै मार्क्सवादिनाम्
सर्ववाद–प्रतिस्पर्धी
दृष्टिकोणो भवत्ययम्––

"धनवादः प्रतनुते
एकत्र धनसञ्चयम्,
बहुत्र दैन्यमर्थित्वम्,
दारिद्र्यं, वृत्तिहीनताम्

आश्रयत्यर्थवादः[१] प्राक्
लघूत्पत्तिकरान्, ततः
तान् बहूत्पादका भूयः
आत्मसात् कुर्वते क्रमात्

वर्तमाने समाजे ते
महान्तो धनिनः समे
भवन्ति राज्यसंस्थायाः
अन्योन्याश्रयिणः सदा

यतो राज्यस्य साहाय्यात्
ते देशेष्वितरेष्वपि
कल्पन्ते स्वस्य वाणिज्यम्
प्रसारयितुमश्रमम्

१ अर्थवादः– पूँजीवाद इति भाषायाम् ।

महतां वणिजां स्वार्थम्
गोप्तुं साम्राज्यवादिनः
देशा मिथो नियुध्यन्ते
व्याप्तुं देशान्तराऽपणम्

धन-सत्ताधारकाणाम्
अध्यादेशेन माद्यताम्
शासकानां शोषणाय
राज्यं भवति साधनम्

संसद्राज्यप्रणाली तु
वर्गस्य धनवादिनाम्
मतं जालं शोषणस्य
परोक्षमधिनायकम्

संसारेऽर्थात् नाऽन्यदस्ति
मुख्यं मानवजीवने
सर्वप्रकारोऽभ्युदयो
धनमेवोपजीवति

मर्त्येतिहासः सकलः
सूक्ष्मदृष्ट्या समीक्षितः
वर्गसङ्घर्षेतिहासः
स्पष्टत्वेनाऽवगम्यते

केचित् स्वर्णस्य पल्यङ्के,
शेषा धूलिषु वर्त्मनः
भूमौ न शान्तिर्न सुखम्
विना त्वर्थसमानताम्

निःश्रमाः सन्ति सधनाः,
श्रमिकाः सन्ति निर्धनाः
भाव्यं श्रमफलेनेह
श्रमिणामेव गुप्तये

क्रमात् उत्पत्तिमूलेषु
सर्वोद्योगेषु, भूमिषु
राष्ट्रियीकरणं कार्यम्
राज्येनैव यथाऽचिरम्

व्यक्ती राज्यायेति दृष्टया
राज्यमेव हि योजयेत्
यावदावश्यकैर्लाभैः,
उचितैश्च श्रमैः प्रजाः

[१]सर्वहार-दलात् एव
श्रमिकैः कृषकैर्बलात्
सा व्यवस्था प्रबध्येत
साऽधिनायक-शासनात्

---

१ लोकप्रचलनात्- 'सर्वेणां जीवनसाधनानां हारः अपहरणं यस्येति' एतस्य साधुत्वं समर्थितम्, सर्वबोधाय संस्कृतकोषसमृद्धये च ।

वादेऽत्र सर्वहाराणाम्
एव स्वाम्यं हि साधनम्,
साध्यं च वर्गहीनस्य
समाजस्य प्रवर्तनम्''

सङ्घर्षारिः शान्तिबन्धोरस्य सर्वोदयाऽध्वनः
अहिंसा साधनम्, साध्यं सर्वाभ्युदय-सुस्थितिः !

—म. गान्धिः

म. गान्धिः

मिथो भेदधिया प्राप्तात्
पारतन्त्र्यात् विदेशिनः
तत् भारतं दीनतायाम्
गच्छदस्ति दिनाद् दिनम्

यत् विद्यायाः, चरित्रस्य,
कलायाः, कौशलस्य च
आविश्वं प्रथमोन्मेषम्
अदात् सर्वसमृद्धिमत्—

तदेव भारतं हन्त !
प्रतिक्षेत्रं, प्रतिस्थिति
सदा परमुखापेक्षि
दीनं हीनं च वर्तते

पृथिव्यां बहवो देशाः,
पाश्चात्या वा विशेषतः
उन्नतेः शिखरे प्राप्ताः,
यदाऽसीत् तस्य सा दशा !

गृहशिल्पं गतं, ग्रामे
गतं तत् पञ्चशासनम्,
गतं गुरुकुल-स्थानम्,
गतम् अध्यात्मदर्शनम् !

परा सत्ता, परा शिक्षा,
परा नीतिः, परैव दृक् !
सर्वा नष्टा भारतस्य
स्वसत्ताः, स्वविशेषताः!

वहिः प्रयाति वस्तु स्वम्,
यन्त्रैः शुल्कैर्महार्घितम्
तदेव क्रीणते भूयः
निःश्रमाः श्रमिका इह

इतः शुल्कं, ततः शुल्कम् !
सर्वत्रैवाऽस्ति शोषणम्
पारेसिन्धु विदेशे श्रीः
भारतस्य प्रसर्पति

भिक्षा उञ्छाः किङ्करताः
अकालमृतयो रुजः
क्रीडन्त्यत्र, विभज्यैतान्
भुञ्जतेऽगतिकाः प्रजाः

एतेषाम् एव रक्तेन,
स्वेदेन च विदेशिनः
स्वामीभूता इमान् एव
दलन्ति स्म ह्युपानहा

अशिक्षातः, कुशिक्षातः
समाजे याऽस्त्यनेकता
सङ्कीर्णा जातयो धर्माः
तां पुष्णन्ति निरन्तरम्

प्रायः समाजे लीनाऽस्ति
विशुद्धा बन्धुभावना
स्वल्पस्वार्थस्याऽपि कृते
नह्येकः सहते परम्

यज्ञप्रथाऽस्ति विच्छिन्ना,
परं मन्दिरमन्दिरे
निःसङ्कोचं च्छागबलिः
दीयते धर्मनामनि

अज्ञो वेत्येव नो धर्मम्,
प्राज्ञश्च परसंस्कृतेः
दास्यात् तं मन्यतेऽपार्थम्,
एवं धर्मोऽस्त्यनाश्रयः

राष्ट्रिया चेतना स्वल्प–
स्वल्पेष्वेवाऽस्ति, मानवाः
इतरे च परोलक्षाः
सन्ति भाग्यसमाश्रिताः

परःकोटिषु ये केचित्
स्युः स्वराज्यस्य याचकाः,
मार्यन्ते पशुमारं ते
सत्तारूढैः निरङ्कुशैः

दुर्धर्षा साऽऽङ्गलसत्ताऽस्त्रैः
कोषैर्नीत्या बलेन च
असाधनैः कथं क्षेप्या ?
समस्यैषाऽस्ति भीषणा !

ईदृशे शान्तिरहिते
व्यापके देशसङ्कटे
ऊनविंशतितम्याश्च
शताब्द्या उपमध्यतः[1]

१ ईसवीये १८६९ तमेऽब्दे ।

अस्य भारतवर्षस्यो–
त्तरतः पोरबन्दरे
उत्पन्नः कर्मचन्दः स
यो गान्धिरिति विश्रुतः

सद्व्रतायाः, धर्मभीरोः
मातुः स्तन्यात् स बाल्यतः
धर्मबुद्धिः, कोमलात्मा
सुशीलः, सत्यवाक् अभूत्

शिक्षावस्थो राजकोटात्
उत्तीर्याङ्गलप्रवेशिकाम्
[1]वाक्कीलत्वस्य शिक्षायै
स बेलायतमव्रजत्

तामुत्तीर्य प्राप्तदृष्टिः
न्यायान्याये, हिताहिते
दीर्घलक्ष्यो महोत्साहः
स स्वदेशं निवृत्तवान्

वाक्कीलत्वं तस्य सदा
न्यायपक्षं समाश्रयत्
आशाम् आङ्कुरयत् तन्वीम्
भारते न्यायवञ्चिते

---

१ वाक्कीलः=वकिल इति भाषायाम् ।

शस्त्रसज्जैः, कूटचालैः,
सभ्यम्मन्यैश्च शासकैः
योद्धुं स निर्ममे नूतनम्
शस्त्रं सत्याग्रहाभिधम्

सोऽफ्रिकायां दक्षिणस्याम्
जातिभेदनयात् भृशम्
सीदतां भारतीयानाम्
कृते सत्याग्रहं व्यधात्

अत्रैव प्राक् अहिंसस्य
स्वस्य सत्याग्रहस्य सः
प्रयोगं, तद्विकासं, तत्-
सिद्धान्तं च वितीर्णवान्

एष एव श्रीगणेशो
मङ्गलस्तस्य भाविनः
सर्वोदयस्य वादस्य
चरित्रस्य च भूरिणः

नेटाले जुलुविद्रोहे,
वोअरराजौ च तत्कृतम्
नेतृत्वं, आहतानां च
सेवाऽभूताम् प्रशंसिते[1]

---

१ तदस्य सञ्जातं तारकादिभ्य इतच् ।

पञ्चालस्याऽत्याचरिते,
कर्हि शुल्के च लावणे
भारतं त्यजतेत्यस्मिन्
प्रस्तावे च स कर्हिचित्–

देशोद्धाराय, धर्माय,
स्वराज्यार्थी स तापसः
कति वारान् अगात् काराः,
अवाप्नोत् कति यातनाः !

निःस्पृहः कर्मयोगी सः
स्मरन् कृत्यं कदापि न
व्यचलत् स्वस्य सङ्कल्पात्,
सत्यात्, धैर्यात् ससाहसात्

सङ्घर्षार्हां स्वराज्यार्थे
कृत्वा स स्वां महासभाम्[१]
अन्ते त्यक्त्वा च ताम् ग्राम–
सुधारादौ प्रलग्नवान्

कर्हि क्वचित् क्वचित् कर्हि
प्रकल्प्य लघुमाश्रमम्
निन्ये कालं स सेवाभिः,
उपदेशैश्च धार्मिकैः

---

१ राष्ट्रियकंग्रेस इति प्रसिद्धाम्।

प्रायोक्ष्यत न देशार्थे
स चेत् स्वाऽनशनायुधम्
अजीविष्यत् भारतं किम्
सांप्रदायिकविग्रहे ?

अस्यैव त्यागतपसा,
साहसेन च भास्वता
उत्क्षिप्तम् भारते खातम्
आङ्ग्लराज्यस्य केतनम् !

प्रजातन्त्रीय-पद्धत्या
प्रोत्तिष्ठत् ह्युत्तरोत्तरम्
तेनैव भारतं जातम्
स्वराट्, महिमभिर्विराट्

विश्वभावनया, देश–
जने चाऽपत्यबद्धिया
संसारस्य महात्माऽभूत्
स 'पिता'[1] भारतस्य च

अन्ते प्राणिसमाजस्य
बन्धुः स प्रार्थनास्थले
निहतो हन्त ! कस्माच्चित्
विक्षिप्तात् अन्धधर्मणः

---

१ 'बापू' इति तस्य प्रसिद्धेः ।

किन्त्वचिन्त्यस्तत्प्रभावः
यत्- दिवं व्रजितोऽपि सः
संनिरुन्धन् अस्ति देशे
सांप्रदायिकविग्रहम् !

महात्मनस्तस्य मृत्यौ
भारतं वाष्पधारया
अशोचत्, परराष्ट्राणि
स्वध्वजावनतेन[1] च

तत्सिद्धान्तो 'गान्धिवाद'–
नाम्ना विश्रूयतेऽभितः
अध्यात्मराजनययो–
रस्ति यत्र समन्वयः

सङ्घर्षारेः शान्तिबन्धोः
गान्धिवादस्य सर्वदा
अहिंसा साधनम्, साध्यम्
सर्वाभ्युदयसुस्थितिः

अर्थनीतौ कामयते
स वैयक्तिकमुद्यमम्
मिथ आर्थिक-वर्गाणाम्
सहयोगं च पूरकम्

१ अवपूर्वकान्नमधातोर्भावे क्तः ।

भूमीपतेः, अर्थपतेः,
राज्यस्य, नृपतेश्च वा
न जिहीर्षति सत्तां सः,
नृणां सा यदि रक्षिका

सर्वेषामेव देशानाम्
स्वातन्त्र्यं सोऽनुमन्यते,
सहैवाऽन्ताराष्ट्रियत्वम्
चापि तत्तस्य गुप्तये

सामाजिकीः, राजनीतीः,
आर्थिकीश्च परिस्थितीः
सामञ्जस्येन, योगेन
स शोधयितुमिच्छति

गान्धिवादो मिथः स्नेहात्,
सेवाभावात् च सश्रमात्
एतत् ध्वान्तं जगद्रूपम्
परिमार्जितुमिच्छति

यत्र तत्र स सद्भावम्,
तपः, त्यागं प्रबोधयन्
जगद्भूत्यै पुनः शुद्धम्
हिन्दुत्वं स्रष्टुमिच्छति !

देशो नैकस्य वंशस्य व्यक्तेर्वा, तत् व्यवस्थितिः
सा कार्या, यां बहुजन–कल्याणम् उपजीवति

–श्री ५ त्रिभुवनः

श्री ५ त्रिभुवनः

ईसवीया शताब्द्यस्ति
विंशी, विश्वस्य मानवाः
सन्ति प्रगतिमार्गेषु
प्राय उन्मीलितेक्षणाः

राष्ट्राणि कानिचित् राष्ट्रा-
न्तराणाम् अधिकारतः
मुक्तानि सन्ति बलवत्
राष्ट्रियाऽन्दोलनान्यनु

राष्ट्रेषु केषुचित् स्वीय-
सर्वकारात् निरङ्कुशात्
कृतस्वातन्त्र्यसङ्घर्षाः
उन्मुक्ताः सन्ति ताः प्रजाः

राष्ट्रेषु कतिषु स्वीय-
सर्वकारस्य दुर्नयात्
पीडितास्ताः प्रजाः सन्ति
सङ्घर्षेषु परायणाः

एवं हिमाद्रेरुत्सङ्गे
स्थिते प्राकृतवैभवे
चीनभारतयोरन्त-
रालवर्तिनि सुन्दरे-

नेपालराष्ट्रेऽपि तदा
चलदासीत् प्रशासनम्
राणावंशस्याऽधिकार-
मदमत्तस्य दुःसहम्

येन केनाऽप्युपायेन
निष्क्रियीकृत्य भूपतिम्
राणाधिकारिणः क्रूरम्
दलन्ति स्म प्रजाः स्वकाः

न विकासो नाऽधिकारो
न वात्सल्यं न वा नयः !
ते भुञ्जते स्म नेपाल-
राज्यं स्वमिव पैतृकम्

एवं चिरात् सन्तपति
पीड्यमाने प्रजागणे
बैक्रमेऽब्दे वायुसख-
रसाङ्कपृथिवीमिते

[1]पृथ्वीवीरस्य भूपस्य
धर्मराज्ञ्यां महामनाः
लोकोत्तरयशा भावी
राजा त्रिभुवनोऽजनि

राज्ञो बह्वनाम् राज्ञीनाम्
चैकः स नयनोत्सवः
राजपुत्रोचितैः सौख्यैः
विविधैः समवर्धत

को हन्त ! विद्यात् अन्यस्य
विधेर्वा गुप्तदुष्कृतिम्
जातेऽस्मिन् पञ्चवर्षीये
तत्तातस्त्रिदिवं गतः

संस्थाप्य चित्रवत् भूपम्
राज्यस्वाम्यं जिहीर्षताम्
राणाधिकारिणां तेन
सफलोऽभूत् मनोरथः

१ श्री ५ पृथ्वीवीरविक्रमशाहदेवस्य ।

मूर्धाभिषिक्तस्य तस्य
पञ्चवर्षस्य नामनि
अभूत् नवपरिच्छेद-
प्रारम्भो जनशोषकः

राणाधिकारिणाम् आसीत्
राज्यसूत्रं निदेशकम्
वयम्, अस्मज्जनाः, अस्म-
दाज्ञा चेत्येव हि त्रयम्

निरङ्कुशाः शासकास्ते
समक्षे देशवासिनाम्
यद्वा तद्वा स्वार्थधिया
राज्यस्वमुपयुञ्जते

न सन्ति नियता न्यायाः
न च न्यायाय संसदः
तेषामिच्छैव हि न्यायाः
त एव न्यायसंसदः

मूढा यान्ति पदेषूच्चैः
तेषाम् इच्छानुवर्तिनः
अधः पतन्ति विद्वांसो-
ऽप्यतदिच्छानुवर्तिनः

तदाऽस्त्येका शासकानाम्
सेवा सर्वार्थ-साधिनी
यया जनाः समृध्यन्ति
न विद्या न च पौरुषम् !

जातमात्रा अपि तदा
शासकानां कुलेऽर्भकाः
सेनापतिपदेनोच्चैः
विभूष्यन्ते सवेतनैः

इतो विद्यालयप्राप्तो–
पाधयोऽपीतरे जनाः
अप्राप्तवृत्तयो नित्यम्
आतङ्क्न्ते किमद्यकाः

न मौलिकोऽधिकारोऽस्ति
विशाम् पञ्जरवासिनाम्
शुकानामिव कष्टेन
जीवनं याति नित्यशः

मालिनां पुष्पसहिते
तराविव जनेऽखिले
सदा सर्वाधिकारोऽस्ति
ससर्वस्वेऽधिकारिणाम्

अवाप्य बहिराङ्ग्लानाम्
शासकानां समर्थनम्
राणावर्गः प्रजा एवम्
पीडयत्यकुतोभयः

तेषाम् अस्ति द्वयम् भीति-
स्थानम्— राज्ञि बहिस्थितेः
बोधः, आराजमारङ्कम्
शिक्षा चोन्मेषदायिनी

ते शासकाः स्वीयजना-
ऽक्षिकारायां नियन्त्र्य तम्
चिकीर्षन्ति सदा मूढम्
विश्व-राष्ट्रपरिस्थितौ

तत् प्रासादे बालभूपम्
तं स्वदेशस्य शिक्षकात्
अपाठयन् विदेशीयम्
बहिर्निष्कास्य शिक्षकम्

राणाधिकारिणां यत्नः
सफलोऽस्ति, यतः प्रजाः
प्रधानमन्त्रिणं ह्येव
मन्यन्ते स्म स्वभूपतिम्

राणाधिकारिणो भूपम्
मद्यवाराङ्गनादिषु
विधित्सन्ति रतं, तस्य
महत्ताशक्तिहानये

भूपस्य द्वादशे वर्षे
प्राच्यरीत्यनुसारतः
कान्तीश्वरीभ्यां कन्याभ्याम्
उद्वाहोऽजनि शास्त्रवत्

ततो महिष्योरुभयोः
अजायन्त सुलक्षणाः
पुत्रास्त्रयः, चतस्रश्च
पुत्र्यः कालेन भूपतेः

सा यन्त्रिता स्थितिः स्वस्य,
प्रजानां साऽस्वतन्त्रता ?
स प्रत्यैक्षिष्ट समयम्
चिन्ताग्रस्तो विमुक्तये

स नेतृभिर्भारतीयैः
सङ्गन्तुं स्वपरिस्थितौ
मिषेण तीर्थयात्रायाः
प्रतस्थे भारतं प्रति

परं नाऽभूत् स सफलः !
यत्,– तत्राऽप्यधिकारिणाम्[1]
तत् भयं, सैव शङ्काऽसीत् !
तद् रहस्तैर्व्यहन्यत

विश्वस्वातन्त्र्यसङ्ग्राम-
वर्णनोन्मेषदायिभिः
विविधैः पुस्तकैः पूर्णम्
मञ्जूषाद्वयमेव सः–

केनाऽपि भारतीयेनो-
पहृतं स्वस्य सादरम्
अमन्यतोपलब्धिं ताम्
स्वयात्राया अनुत्तमाम्

ततो निवृत्य पठितो-
न्मेषकृत्सर्वपुस्तके
भूपे राणाविरोधी सः
सङ्कल्पो द्विगुणोऽभवत्

ततो गुणाङ्काङ्कविधु-
मिते वैक्रमहायने
तस्य टङ्कप्रसादस्या-
ऽचार्योपाह्वस्य धीमतः–

१ राणाधिकारिणाम् ।

नेतृत्वे साहसमये
राणाशक्त्यपनुत्तये
　　गुप्तं प्रजापरिषदः
　　कृतं सङ्घटनं जनैः

कालं प्रतीक्षमाणस्य
दूरदृष्टेर्महीपतेः
　　गुप्तेन सहकारेण
　　साऽजनिष्ट द्रढीयसी

साऽऽकर्षन्ती जनमतम्
वर्धयन्ती स्वकं बलम्
　　तन्वती गुप्तकार्याणि
　　शासकाऽक्षिगताऽभवत्

टङ्कप्रसादप्रमुखाः
नेतारः क्रूरशासकैः
　　यन्त्रिता बन्धनागारे
　　अनु वर्षचतुष्टयम्

वन्दीकृतानां तेषां च
मध्यतो ब्राह्मणेतरे[1]
　　चत्वारः शुक्रराजाद्याः
　　प्राणदण्डेन योजिताः

---

१ तदा राज्यनियमेन वधोचितेऽपराधेऽपि ब्राह्मणा नो वध्यन्ते स्म ।

सन्दर्भेऽस्मिन् नरपतेः
वैमत्यं शासकैः सह
अभूत्, यतः स द्विगुणम्
तेषाम् अक्षिगतोऽभवत्

एवं स्पष्टतया भूपम्
विदित्वा स्वविरोधिनम्
अन्तर्जज्वाल राणानाम्
वर्गः प्रतिचिकीर्षया

ये हतास्ते हताः, ये च
यन्त्रितास्तेऽपि यन्त्रिताः
[1]पर्षदोऽन्ये सदस्यास्तु
ह्यन्तर्भूमिं गता भयात्

अन्यतो भारते स्थित्वा
सा [2]नेपालिमहासभा
विरुणद्धि स्म राणानाम्
शासनं ख्यातदुर्नयम्

---

१ प्रजापरिषदः ।

२ नेपालिकंग्रेस ।

तथाऽपि शासका नैव
तदा किञ्चित् व्यचालिषुः—
'सा बहिःस्था कथङ्कारम्
दूरतो धर्षयेत् !' इति

परं कालेन, 'जयतु—
संस्कृतम्' नाम विश्रुतम्
जातमान्दोलनं देशे
बहिर्भूम्येव दुर्दमम्—

यत् वीरैः संस्कृतच्छात्रैः
राणाशासनशत्रुभिः
श्रीभद्रकाशीनाथाद्यैः
व्यस्तार्यत सुनिर्भयैः

घातुके शासने तस्मिन्
तत् तथाऽऽन्दोलनं कृतम्
आसीत् त्यक्त्वा भयं साक्षात्
मृत्योरेवाऽभिषेणनम् !

जातमान्दोलनं तद्धि
यावत् षोडशवासरान्
अक्षोभयत् मनो राणा—
वर्गस्य प्रगतिद्विषः

प्रथमोऽवसरः सैषः,
यदा राणाधिकारिणः
जनतायाः पुरो नेमुः
हित्वा मूढं स्वमाग्रहम्

आ काल्या आ च मेच्या ये
छात्राः संस्कृतपाठिनः
सकलास्तेऽभवन् राणा-
शासनप्रतिपन्थिनः

ततो देशस्य कोणेषु,
ग्रामान्तरपि सर्वतः
अनारतं विरोधोऽभूत्
दुर्निरोधोऽधिकारिणाम्

अन्तः सैष विरोधोऽन्यो
दुष्प्रचारो विदेशत[1]:
इतरस्तन्मिथोभेद-[2]
श्चोच्चनीचत्वकारणः!

---

१ नेपालिमहासभाकृतः।

२ राणापरिवारे महिषीजाता उच्चा भोगिनीजाता नीचा इति व्यवस्थाजन्यो मिथोभेद इति भावः।

एतैर्बीजैः क्षुब्धमूले
क्षतवीर्ये विगर्हिते
राणावर्गे केवलेना-
ऽहङ्कारेणैव जीवति-

दिदृक्षुरह्नाय निजम्
देशं प्रगतिपद्धतौ,
जनता अर्थसम्पन्नाः
शिक्षिताश्चोत्तरोत्तरम्-

नगव्योमाकाशनेत्र-
मिते वैक्रमहायने
एकविंशे कार्तिकस्य
दिनाङ्के सपरिच्छदः-

जनक्रान्तेर्नायकत्वम्
स्वयं कर्तुम् दृढाशयः
त्यक्तसर्वोपभोगाढ्य-
राज्यसिंहासनाश्रयः-

प्रविष्टवान् सहायार्थी
शासकानां निषेधताम्
नेपालस्थं भारतीयम्
दूतावासं नराधिपः

ततस्तं मध्यमं पौत्रम्
राज्ञो ज्ञानेन्द्रनामकम्
अभ्यसिञ्चन् नृपस्थाने
शासकाः कूटवृत्तयः

वज्रनिर्घोषतुल्येनो-
दन्तेनैतेन सर्वतः
जनमानसवीचीषु
प्रकम्प उदपद्यत

प्रजातन्त्रव्यवस्थाऽर्थी
भारताप्तसहायतः
भारतस्थो नृपः क्रान्ति-
प्रबन्ध-प्रसितोऽभवत्

इतः प्रबुद्ध 'जयतु-
संस्कृतम्'छात्रसंहतिः
राणानयं सोच्चघोषम्
व्यरुणत् सप्रदर्शनम्

पातसज्जाः शासकास्ते
छात्रान्, तदनुयायिनः
अन्यांश्च कर्मठान् तिग्म-
कारादण्डैरपीडयन्

राज्ञो नेतृत्वसहिताम्
सदिच्छां प्राप्य सर्वतः
साऽयुधा देशयुवकाः
अभ्ययान् क्रूरशासकान्

गिरिव्योमाकाशनेत्र-
मिते वैक्रमहायने
माघस्याऽन्तिमसप्ताहे
युगशत्रुर्निरङ्कुशः–

राणावर्गोऽन्ततो गत्वा
ननाम जनताऽग्रतः
उदन्तोऽयं सर्वविशाम्
अभूत् दिव्यसुखप्रदः

ततः फाल्गुनमासस्य
चतुर्थे दिवसे शुभे
जनानन्दसहस्रांशौ
प्राप्ते मध्यान्हसीमनि–

स्वस्य प्रजाऽर्थेऽक्षयिणीम्
अनर्घाम् मुक्तिसम्पदम्
समर्ज्य कालात् यशसा,
साफल्येन सहाऽगतम्–

शत्रुतामिस्रहं चन्द्रम्
इवाऽतिग्मकरं नृपम्
साऽम्रेडं जयवादैस्तैः
अभ्यनन्दन् मुदा प्रजाः

ततः सन्तोषविश्वास-
मग्नचित्ते प्रजाजने
फाल्गुनस्यैव मासस्य
दिनाङ्के सप्तमे नृपः–

विघटच्य शासनं पूर्वम्
एकतन्त्रं निरङ्कुशम्
प्रजातन्त्रोचितं नव्यम्
सर्वकारम् अघोषयत्

उत्सृज्य राज्यं भोगांश्च
राजकीयान् अनुत्तमान्
नियुध्य बलवत् स्वेच्छा–
चारिभिः क्रूरशासकैः–

स्वयं प्रजाभ्यो वितरन्
प्रजातन्त्रव्यवस्थितिम्
धन्यो राजा त्रिभुवनो
जयत्यखिलभूभुजाम् !

एवं साधितकर्तव्यः
उत्सिसृक्षुरिवाऽवनीम्
किंवाऽमरगुणाकृष्टैः
आमन्त्रित इवाऽमरैः—

वज्रायितेनोदन्तेन
प्रजाः शोके निमज्जयन्
रुजार्त उपचाराय
गतः समहिषीद्वयः—

हन्त! राजा त्रिभुवनः
सुरलोकं ययौ निसात्[1]
भूक्ष्माऽभ्रलोचनमित—
वैक्रमाब्दस्य फाल्गुने

राज्ञस्त्रिभुवनस्यैषा
भव्या भूपोत्तरा कृतिः
निर्दिशत्येवमखिलान्
भूपान्, नेतॄन्, प्रशासकान्——

"कामं भवतु कालेन
या काऽपि च परिस्थितिः
प्रजाजने सदा भाव्यम्
सदयैः राज्यकर्तृभिः

---

१ स्वीट्जरल्याण्डस्य राजधान्याः ।

देशो नैकस्य वंशस्य
व्यक्तेर्वा, तत् व्यवस्थितिः
सा कार्या, यां बहुजन–
कल्याणम् उपजीवति

देशभूत्यै, बहुजन–
क्षेमाय च सुधारकैः
त्याज्यानि नितराम् ऋद्धम्
राज्यं, भोगाः, धनानि च"

सहायकग्रन्थाः

मुक्तिकोपनिषद्

श्रीमद्भगवद्गीता

विश्व इतिहासकी रूपरेखा (श्री प्यारेलाल)

महापुरुषोंके दर्शन (प्रो. रामस्वरूप कौशल)

इस्लाम धर्मकी रूपरेखा (श्री महापण्डित राहुल साँकृत्यायन)

आत्मकथा (म. गान्धि)

लेखकस्याऽन्याः कृतयः

(१) सत्यहरिश्चन्द्रम् (महाकाव्यम् –संस्कृते)

(२) तदर्थमेव (कवितल्लजस्य श्री म. बी. वि. शाहस्य 'उसैको लागि' इति कवितासङ्ग्रहस्य अनुवादः – संस्कृते)

(३) ईशावास्यवृत्तिः (विनोवामहोदयस्येशावास्यवृत्तेरनुवादः – संस्कृते)

(४) अगुल्टो (कवितासङ्ग्रहः – नेपाल्याम्)

(५) झिल्का (भावनात्मककथासङ्ग्रहः – नेपाल्याम्)

(६) म लोग्ने हुँ (लघिष्ठकथासङ्ग्रहः – नेपाल्याम्)

(७) एक्काईस कथा (कथासङ्ग्रहः – नेपाल्याम्)

श्री ५ को सरकारको छापाखानामा मुद्रित ।